Total No. of Questions : 5 ] [ Total No. of Printed Pages : 2

**Code No. : MR-01**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्—अलङ्कारशास्त्रम्

### भागः - १, पत्रिका - १

### विषयः - कुवलयानन्दः-३

**दिनाङ्कः** - 19-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. एकेन वाक्येन उत्तरत** **8 x 2=16**

१. 'पञ्चमोदञ्चने काले कोकिलः कोकिरोऽभवत्' इत्यत्र कः अलङ्कारः विद्यते ?

२. संसृष्टेः लक्षणं किम् ?

३. खस्रजं वहन् वेश्यां वशयेत्' इत्यत्र विद्यमाना अलङ्कृतिः का ?

४. दोषगुणयोः गुणदोषत्वकल्पने कोऽलङ्कारो जायते ?

५. पुनः स्वगुणसम्प्राप्तौ कोऽलङ्कारो भवति ?

६. उल्लासालङ्कारे गुणपदस्यार्थः कः ?

७. 'केदारपोषणरताः के खेटाः किं चलं वयः' इत्यत्र का अलङ्कृतिः ?

८. प्रमाणालङ्काराः के ?

**II. लक्षणं विलिख्य सोदाहरणमलङ्कारचतुष्टयं निरूपत ।** **4 x6=24**

१. अनुमानम् २. विधिः ३. ऊर्जस्वी

४. लोकोक्तिः ५. अत्युक्तिः ६. सम्भावना

**III. एतेषु द्वौ सयुक्तिकम् उपपादयत ।** **2 x 10=20**

१. विमतमाशङ्क्य ललितं सयुक्तिकं स्फुटयत ।

२. अर्थान्तरन्यासं सयुक्तिकं सोदाहरणं प्रतिपादयत ।

३. एकवाचकानुप्रवेशसङ्करस्य ग्रन्थोक्तानि लक्षणानि सयुक्तिकं प्रतिपादयत ।

–अनुवर्तते

**IV. पद्यचतुष्टयस्य अलङ्कारं सलक्षणं निरूप्य समन्वयत।** **4 x 6=24**

१. पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासा।
अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव॥

२. अहो केनेदृशी बुद्धिः दारुणा तव निर्मिता।
त्रिगुणा श्रूयते बुद्धिः न तु दारुमयी क्वचित्॥

३. एष ते विद्रुमच्छायो मरुमार्ग इवाधरः।
कस्य नो तनुते तन्वि पिपासाकुलितं मनः॥

४.विवृण्वता दोषमपि च्युतात्मना त्वयैकमीशं प्रति साधु भाषितम्।
यमामनन्त्यात्मभुवोऽपि कारणं कथं स लक्ष्यप्रभवो भविष्यति॥

५. किमसुभिर्ग्लपितैर्जड मन्यसे मयि निमज्जतु भीमसुतामनः।
मम किल श्रुतिमाह तदर्थिकां नलमुखेन्दुपरां विबुधः स्मरः॥

६. कल्याणी तव गाथेयं लौकिकी प्रतिभाति मे।
एति जीवन्तमानन्दो नरं वर्षशतादपि॥

**V. एषु द्वयोर्युगलयोः परस्परं वैलक्षण्यं सोदाहरणं स्फुटयत।** **2 x 8=16**

१. मीलितम् – सामान्यम्

२. गूढोक्तिः – विवृतोक्तिः

३. युक्तिः – पिहितम्

—०—

Total No. of Questions : 5 ] [ Total No. of Printed Pages : 2

**Code No. : MR-02**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्–अलङ्कारशास्त्रम्

### भागः - १, पत्रिका - २

### विषयः - साहित्यदर्पणम् –४

**दिनाङ्कः** - 20-03-2014 ] [ **गरिष्ठाङ्काः** - १००

**समयः**- 2.00 .P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**I. एषां सङ्क्षिप्तमुत्तरं लिखत** **8 x 2=16**

१. निद्रामुपेतस्य यः विषयानुभवः किमिति कथ्यते ? स्फुटयत ।

२. का नाम मुग्धता ? विशदयत ।

३.सत्त्वजाः पौरुषाः गुणाः के ?

४. नायकस्य दण्डसहायाः के ?

५. नायकस्य अन्तःपुरसहायाः के ?

६. दूताः कति ? तेषां नामानि निर्दिशत

७. 'शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्' इति केन प्रतिपादितम् ? विशदयत ।

८. कस्मात् रसः निष्पद्यते ? रससूत्रं केन विरचितम् ? निरूपयत ।

**II. तेषु चत्वारः समाधेयाः** **4 x 7=28**

१. रसानाम् अलौकिकत्वं सयुक्तिकं प्रतिपादयत ।

२. गुणीभूतव्यङ्ग्यस्य स्वरूपं किम् ? तेषु कौचित् द्वौ उदाहरणनिरूपणपुरस्सरं विशदीकुरुत ।

३. उदाहरणद्वयनिरूपणपुरस्सरं शृङ्गारमुपवर्णयत ।

४. रसानां परस्परविरोधं तत्परिहारोपायन् च सोदाहरणं निरूपयत ।

५. उग्रतामर्षसन्त्रासानां लक्षणं सोदाहरणं विशदीकुरुत ।

**III. एतासु सप्रसङ्गं चतस्रः कारिका व्याख्येयाः** **4 x 6=24**

१. रसभावौ तदाभासौ भावस्य प्रशमोदयौ ।
सन्धिः शबलता चेति सर्वेऽपि रसनाद्रसाः ॥

२. पारिमित्याल्लौकिकत्वात्सान्तरायतया तथा ।
अनुकार्यस्य रत्यादेरुद्बोधो न रसो भवेत् ।



–अनुवर्तते

३. विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा।
रसतामेति रत्यादिः स्थायी भावः सचेतसाम् ॥

४. स्फुटं चमत्कारितया वत्सलं च रसं विदुः ।
स्थायी वत्सलता स्नेहः पुत्राद्यालम्बनं मतम् ॥

५. न यत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ न च काचिदिच्छा ।
रसः स शान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु समप्रमाणः ॥

**IV. एतेषु चतुरः श्लोकान् सावतरणं व्याख्यात ।** **4 x6=24**

१. गुरोर्गिरः पञ्चदिनान्यधीत्य वेदान्तशास्त्राणि दिनत्रयं च ।
अमी समाघ्राय च तर्कवादान्समागताः कुक्कुटमित्रपादाः ॥

२. शिखरिणि क्व नु नाम कियच्चिरं किमभिधानमसावकरोत्तपः ।
सुमुखि येनतवाधरपाटलं दशति बिम्बफलं शुकशावकः ॥

३. करमुदयमहीधरस्तनाग्रे गलिततमःपटलांशुके निवेश्य ।
विकसितकुमुदेक्षणं विचुम्बत्ययममरेशदिशो मुखं सुधांशुः ॥

४. उत्तिष्ठ दूति यामो यामो यातस्तथापि नायाः ।
यातः परमपि जीवेज्जीवितनाथो भवेत्तस्याः ॥

५. हिममुक्तचन्द्ररुचिरः सपद्मको मदयन् द्विजाञ्जनिततमीनकेतनः ।
अभवत् प्रसादितसुरो महोत्सवः प्रमदाजनस्य स चिराय माधवः ॥

**V. एषु द्वयोः टिप्पणीं विलिखत ।** **2 x 4=08**

१. सात्त्विकभावाः

२. शमः

३. वीररसः

—०—

Total No. of Questions : 9 ] [ Total No. of Printed Pages :

**Code No. : MR-03**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्–अलङ्कारशास्त्रम्

### भागः - १, पत्रिका - ३

## विषयः - साहित्यदर्पणम्, काव्यमीमांसा च

**दिनाङ्कः** - 22-03-2014 ] [ **गरिष्ठाङ्काः** - १००

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

### प्रथमो भागः

### साहित्यदर्पणः-६

I. 'सभङ्गश्लेष एव शब्दश्लेषविषयः, अभङ्गश्लेषस्तु अर्थश्लेष एव' एतद्विचारयत । **15**

II. प्रहेळिकाः कुतः न अलङ्कारा भवितुमर्हति ? तस्याः द्वैविध्यं प्रदर्श्य उदाहरणेषु सङ्गमयत । **05**

III. अलङ्कारसामान्यलक्षणं विलिख्य गुणात् अलङ्कारस्य पार्थक्यं स्पष्टयत । **05**

IV. **सप्रसङ्गं इमानि वाक्यानि व्याख्यात** **5 x3=15**

१. सकलकलं पुरमेतज्जातं सम्प्रति सुधांशुबिम्बमिव ।

२. सर्वस्वं हर सर्वस्य त्वं भवच्छेदनतस्तत्परः । नयोपकारसामुख्यमायासि तनुवर्तनम् ॥

३. दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः । विरूपाक्षस्य जयिनीस्ताः स्तुमो वामलोचनाः ॥

### द्वितीयो भागः

### काव्यमीमांसा-३

V. कविसमयो नाम कः ? जाति-द्रव्यगुणक्रियाणाम् एकैकमुदाहरणं प्रदर्श्य लक्ष्ये सङ्गमयत । **10**

VI. अर्थहरणेषु आलेख्यप्रख्याभेदाः कति? तेषां विभागं नामतो निर्दिश्य समक्रम-उत्तंसप्रत्त्यापत्तीनां लक्षणं विलिख्य लक्ष्ये सङ्गमयत । **10**

VII. देशविषये जगन्ति कति इति विविधविपश्चितां मतं यथाग्रन्थं प्रदर्श्य ग्रन्थकाराभिप्रायं विलिखत । **10**

VIII. अ) सम्राट्चक्रवर्तिनोः वैलक्षण्यं यथाग्रन्थं विशदयत । **05**

आ) कुमारद्वीपे विद्यमानान् पर्वतान् नाम्ना निर्दिश्य मलयपर्वतमधिकृत्य लिखत । **05**

IX. **लघुटिप्पणीं लिखत (चतुर्णामपि)** **4x 5=20**

१. दक्षिणापथः २.नटनेपथ्यम् ३. दिशः ४. विशेषोक्तिः

—०—

Total No. of Questions : 7 ] [ Total No. of Printed Pages : 2

**Code No. : MR-04**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्–अलङ्कारशास्त्रम्

### भागः - १, पत्रिका - ४

### विषयः - मृच्छकटिकम् - अभिषेकनाटकं च

**दिनाङ्कः** - 23-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 .P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**I. एकवाक्येन उत्तरं लिखत** **10 x1=10**

१. मृच्छकटिकस्य कर्ताः कः ?

२. रूपकस्य कति भेदाः सन्ति ?

३. मृच्छकटिके नायकः कः ?

४. मृच्छकटिके प्रधानरसः कः ?

५. चारुदत्तः कुत्र वसति स्म ?

६. सुख कदा शोभते ?

७. अपरं षष्ठं महापातकं किमस्ति ?

८. मृच्छकटिकस्य प्रथमाङ्कः किमभिधानः ?

९. चारुदत्तपुत्रस्य नाम किम् ?

१०. मृच्छकटिके चौर्यं कः प्रशंसति।

**II. लघूत्तराणि लिखत** **2 x 5=10**

१. प्रकरणस्य लक्षणं किम् ?

२. नायकस्य सामान्यलक्षणं किम् ?

३. नीलकण्ठस्य कीदृशः कण्ठः वः पातु ?

४. चारुदत्तः दारिद्र्यविषये किं शोचति ?

५. शर्विलकेन स्त्रियः चपलाः इति कथं समर्थितम् ?

**III. पुटपरिमितं प्रश्नान् उत्तरत** **5x 4=20**

१. शूद्रकस्य वंशदेशकालादिकं विलिखत।

२.मृच्छकटिकस्य प्रथमाङ्कस्य सारं लिखत।



–अनुवर्तते

३.मृच्छकटिकमिति नामकरणे निदानं किम् ? विशदयत।

४. मृच्छकटिके विद्यमानां सामाजिकस्थितिं विमृशत।

**IV. पद्यानां सान्वयमर्थं विलिखत** **5 x 4=20**

१. शून्यमपुत्रस्य गृहं चिरशून्यं नास्ति यस्य सन्मित्रम्।
मूर्खस्य दिशः शून्याः सर्वं शून्यं दरिद्रस्य॥

२. राजमार्गो हि शून्योऽयं रक्षिणः सञ्चरन्ति च।
वञ्चना परिहर्तव्या बहुदोषा हि शर्वरी॥

३. गुणेषु यत्नः पुरुषेण कार्यो न किञ्चिदप्राप्यतमं गुणानाम्।
गुणप्रकर्षादुडुपेन शम्भोरलङ्घ्यमुल्लङ्घितमुत्तमानाम्॥

४. यथैव पुष्पं प्रथमे विकाशे समेत्य पातुं मधुपाः पतन्ति।
एवं मनुष्यस्य विपत्तिकाले छिद्रेष्वनर्थाः बहुलीभवन्ति॥

**V. सप्रसङ्गं चत्वार्यपि व्याख्यात** **4 x 3=12**

१. अपराध्यतापि दुर्जनेन उपकृतम्। येन प्रियसङ्गमः प्रापितः।

२. वयस्य गता वसन्तसेना। तदेहि, गृहमेव गच्छाव।

३. अहमिदानीमनृतमभिधास्ये।

४. भद्र जानीषे कस्य तत् प्रवहणमिति ?

**VI. टिप्पणीं रचयत (चतुर्णामपि)** **4 x 3=12**

१. भरतवाक्यम्   २. वसन्तसेना

३. शकारः   ४. विदूषकः

**VII.**

**१. सन्धिं विभज्य नाम लिखत** **1 x 4=04**

अ. तास्वेव   आ. शृगालीव   इ. तदाऽस्य   उ. एतच्च

**२. विगृह्य समासनाम लिखत** **1 x 4=04**

क. द्यूतकरभावः   ख. दुर्लभदर्शनः   ग. राजश्यालः   घ. खण्डितवृत्तः

**३. अत्रत्यमलङ्कारं सलक्षणं विवृणुत** **1 x 4=04**

असत्पुरुषसेवेव दृष्टिर्विफलतां गता।

**३. प्रस्तारं कृत्वा सलक्षणं वृत्तनाम लिखत** **1 x 4=04**

किं त्वं पदैर्मम पदानि विशेषयन्ती।

—०—

Total No. of Questions : 3] [ Total No. of Printed Pages : 1

**Code No. : MR-05**

# स्नातकपरीक्षा:–२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– सामान्यभागः

### भागः - २, पत्रिका - ५

## विषयः - सिद्धान्तमुक्तावली, कारिकावली च

**दिनाङ्कः** - 25-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. यथारुचि पञ्च प्रश्नाः समाधेयाः** **5 x 10=50**

१. मङ्गलस्य सफलत्वं साधयत।

२. ईश्वरसाधकं प्रमाणं विवृणुत।

३. सामान्यस्य लक्षणं सदलकृत्यं निरूपयत।

४.'तत्र क्षितिः गन्धहेतुः' इमं ग्रन्थं प्रपञ्चयत।

५. पाषाणस्य पृथिवीत्वं समर्थयत।

६. जले माधुर्ये किं प्रमाणम् ? विशदयत।

**II. त्रयाणामेव प्रश्नानां यथाग्रन्थं विवरणं दीयताम्।** **12x 3=36**

१. सुवर्णं तैजसम्।

२. शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः।

३. प्रत्यक्षं षड्विधं मतम्।

४. अलौकिकस्तु व्यापारः त्रिविधः।

**III. द्वयोः टिप्पणीं लिखत।** **7x 2=14**

१. आत्मा इन्द्रियाद्यधिष्ठाता।

२. सामान्यं द्विविधम्।

३. जन्यानां जनकः कालः।

—०—

Total No. of Questions : 18.(6+5+7) ] [ Total No. of Printed Pages : 1

**Code No. : MR-06**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्— सामान्यभागः

### भागः - २, पत्रिका - ६

### विषयः - दर्शनेत्यादिः

**दिनाङ्कः** - 26-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 .P.M. to 5.00 P.M ] [ Max. Marks : 100

---

**प्रथमः भागः**

**(अस्मिन् भागे पञ्चैव प्रश्नाः समाधेयाः ।** **5 x9=45**

१. 'त्रयो वेदस्य कर्तारः भण्डधूर्तनिशाचराः' ग्रन्थमिमं व्याख्यात ।

२. उपाधिस्वरूपं निरूपयत ।

३. आर्हतोक्तं रत्नत्रयं विवृणुत ।

४.साङ्ख्योक्तं सत्कार्यवादं स्पष्टयत ।

५. साङ्ख्योक्तं प्रकृतिस्वरूपं वर्णयत ।

६.साङ्ख्योक्तमुक्तिस्वरूपं विवेचयत ।

**द्वितीयः भागः**

**(अस्मिन् भागे त्रयः प्रश्नाः समाधेयाः ।** **3 x5=15**

१. तत्त्वप्रकाशकर्तुः देशकालादिमधिकृत्य प्रबन्धमेकमारचयत ।

२. तत्त्वप्रकाशोक्तं पाशस्वरूपं प्रतिपादयत ।

३. तत्त्वप्रकाशोक्तं मोक्षस्वरूपं निरूपयत ।

४. इदं पद्यं व्याख्यात ।

'चिद्घन एको व्यापी नित्यः सततोदितः प्रभुः शान्तः ।
जयति जगदेकबीजं सर्वानुग्राहकः शम्भुः ॥'

५. टिप्पणीरारचयत (द्वयोरेव)

१. पतिः २. कर्म ३. मोहनिवृत्तिः

–अनुवर्तते

## तृतीयः भागः

**(अस्मिन् भागे पञ्चैव प्रश्नाः समाधेयाः ।** **5 x8=40**

१. इदं पद्यं व्याख्यात

‘पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम् ।
स्वप्नोऽन्यगेहवामश्च नारीसन्दूषणानि षट् ॥

२. मनूक्तरीत्या दायभागं विवृणुत ।

३. स्त्रीस्वातन्त्र्यं निराकुर्वतः मनोरभिप्रायं विशदीकुरुत ।

४. बीजक्षेत्रयोः कस्य प्राधान्यमिति निरूपयत ।

५. विद्यमानासु स्मृतिषु मनुस्मृतेः अभ्यर्हितत्वं स्पष्टयत ।

६. मातापित्रोः मरणानन्तरं पैतृकं धनं कस्य ? विचारयत ।

७. टिप्पणीरारचयत

१. कानीनपुत्रः २. औरसपुत्रः

—०—

Total No. of Questions : 3 ] [ Total No. of Printed Pages : 1

**Code No. : MR-07**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– व्याकरणशास्त्रम्

### भागः - १, पत्रिका - १

### विषयः - परिभाषेन्दुशेखरः

**दिनाङ्कः** - 19-03-2014 ] [ **गरिष्ठाङ्काः** - १००

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. यथारुचि पञ्च प्रश्नान् उत्तरयत ।** **12 x 5=60**

१. नञिवयुक्तन्यायं सावतरणं व्याख्यात ।

२. निरनुबन्धकग्रहणे सानुबन्धकस्य ग्रहणं न भवतीति कथं प्रतिपादितं नागेशेन ?

३. सन्निपातपरिभाषां ग्रन्थोक्तदिशा प्रतिपाद्य तस्या अनित्यत्वप्रतिपादकानंशान् विलिखत ।

४. ज्ञापकत्वप्रदर्शनपूर्वकं 'चानुकृष्टं नोत्तरत्र' परिभाषां विवृणुत ।

५. 'बिल्वकादिभ्यश्छस्य लुक्' सूत्रस्थं छग्रहणं कां परिभाषां ज्ञापयतीति सोदाहरणं प्रतिपादयत ।

६. सावतरणं 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इत्यस्याः व्याख्यानं कुरुत ।

**II. इमे अवतरणिके ससन्दर्भं विशदयत ।** **10 x 2=20**

१. ननु कंसपरिमृड्भ्यामित्यादौ मृजेर्वृद्धिः दुर्वारा ।

२. ननु नमस्करोति देवान्, नमस्यति देवान् इत्यादौ 'नमःस्वस्तिस्वाहा....' इति चतुर्थी दुर्वारा ।

**III. एषां टिप्पणीमारचयत ।** **5 x 4=20**

१. साम्प्रतिकाभावे भूतपूर्वगतिः

२. लक्षणप्रतिपदोक्तन्यायः

३. तद्गुणसंविज्ञानबहुव्रीहिः

४. प्रत्येकं वाक्यपरिसमाप्तिः

—o—

Total No. of Questions : 3 ] [ Total No. of Printed Pages : 1

**Code No. : MR-08**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्— व्याकरणशास्त्रम्

### भागः - १, पत्रिका - २

### विषयः - प्रौढमनोरमा

**दिनाङ्कः** - 20-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 .P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**I. यथारुचि पञ्च प्रश्नाः समाधेयाः** **12 x 5=60**

१. सोदाहरणं 'हलस्तद्धितस्य' इति सूत्रं व्याख्यात ।

२. 'अर्थे प्रथमा इत्येव सारम्' इति पक्षं यथाग्रन्थं समर्थयत ।

३. दलप्रयोजनवर्णनपूर्वकं 'कर्तुरीप्सिततमं कर्म' इति सूत्रं प्रपञ्चयत ।

४. अनभिहिताधिकारस्य दीक्षितोक्तदशा फलमुपपाद्य सिद्धान्तयत ।

५. सावतरणं कारिकामिमां व्याख्यात-

वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम् ।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः ॥

६. अपादानस्वरूपं विवृत्य, 'परस्परान्मेषावपसरतः' इत्यत्र अपादानत्वं प्रसाधयत ।

**II. सावतरणं द्वयं व्याख्यात ।** **10 x 2=20**

१. उपपदविभक्तेः कारकविभक्तिर्बलीयसी ।

२. पितुरत्र क्रियासम्बन्धः शाब्दः ।

३. कर्मणा यमभिप्रैति स सम्प्रदानम् ।

**III. चतुर्णां शाब्दबोधप्रकारं प्रदर्शयत ।** **5 x 4=20**

१. राम मां पाहि । २. देवदत्तः हरिं भजति ।

३. गां दोग्धि पयः । ४. वृक्षात्पर्णं पतति ।

५. पुत्रेण सहागतः पिता ।

—०—

Total No. of Questions : 3 ] [ Total No. of Printed Pages : 1

**Code No. : MR-09**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्— व्याकरणशास्त्रम्

### भागः - १, पत्रिका - ३

### विषयः - महाभाष्यम्-३

**दिनाङ्कः** - 22-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. यथारुचि पञ्च प्रश्नाः समाधेयाः** **12 x 5=60**

१.' न वैशेषिकादिसूत्राणि, अपितु अङ्गत्वात् व्याकरणसूत्राण्येव' इति कैयटोक्तेः किं तात्पर्यम्? ससन्दर्भं व्याख्यात ।

२. किं नाम तद्भावितग्रहणम् ? एतत्पक्षाश्रयणे को दोषः ? सोदाहरणं विशदयत ।

३. वृद्धिसञ्ज्ञासूत्रे सञ्ज्ञाधिकारः कर्तव्यो वा नेति विचार्य लिखत ।

४. 'न यथालोके, तथा व्याकरणे' इत्यस्याशयं स्पष्टीकुरुत ।

५. 'इको गुणवृद्धी' सूत्रस्य अलोऽन्त्यशेषत्वे को दोषः ? विचार्य लिखत ।

६. 'इको गुणवृद्धी' इत्यस्मिन् सूत्रे वृद्धिग्रहणं किमर्थम् ?यथाग्रन्थं विवृणुत ।

**II. ससन्दर्भं द्वयं व्याख्यात ।** **10 x 2=20**

१. इष्टवाची परशब्दः

२. नावश्यं द्विकार्ययोग एव विप्रतिषेधः ।

३. आचार्याचारात् सञ्ज्ञासिद्धिर्भवति

**III. चतुर्णामेव टिप्पणीं रचयत ।** **5 x 4=20**

१. इतरथा ह्यसम्प्रत्ययो यथा लोके ।

२. अनाकृतिः ।

३. सिद्धं तु नित्यशब्दत्वात् ।

४.अवयवे वाक्यपरिसमाप्तिः ।

५. सञ्ज्ञया विधाने नियमः

—०—

Total No. of Questions :3 ] [ Total No. of Printed Pages : 1

**Code No. : MR-10**

# स्नातकपरीक्षाः—२०१४

## बि.ए. — विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्— व्याकरणशास्त्रम्

### भागः - १, पत्रिका - ४

## विषयः -लघुशब्देन्दुशेखरः

**दिनाङ्कः** - 23-03-2014 ] **[ गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. यथारुचि पञ्च प्रश्नाः समाधेयाः** **12 x 5=60**

१. रप्रत्याहारसिद्धिप्रकारमुपवर्ण्य नागेशमतरीत्या खण्डयत।

२. 'पूर्वत्रासिद्धम्' इति सूत्रस्य अधिकारत्वे प्रयोजनं प्रदर्श्य, शास्त्रासिद्धत्वं प्रसाधयत।

३. 'आद्यन्तौ टकितौ'इति सूत्रं ग्रन्थोक्तदिशा व्याख्यात।

४. तपरसूत्रे तपरपदे समासद्वयाश्रयणे प्रमाणं प्रदर्श्य सूत्रं नियमार्थमुत विध्यर्थमिति निर्णयत।

५.'अनेकल्शित्सर्वस्य' इति सूत्रे शिद्ग्रहणस्य प्रयोजनं प्रतिपादयत।

६. सदलकृत्यम् 'अचः परस्मिन् पूर्वविधौ' इति सूत्रस्य अर्थं स्पष्टयत।

७. नागेशोक्तदिशा 'निपात एकजनाङ्' इति सूत्रं व्याख्यात।

**II. ससन्दर्भं वाक्यद्वयं व्याख्यात।** **10 x 2=20**

१. दशसूत्रावृत्तौ गौरवात्।

२. अनुबन्धाः गौरवात्।

३. न च 'पूर्वत्र न' इत्येव सूत्रमस्तु।

**III. चतुर्णां टिप्पणीं रचयत।** **5 x 4=20**

१. अयोगवाहाः

२. अक्षरसमाम्नायः

३. धातुः

४. अवसानम्

५. स्वरितेनाधिकारः

—०—

Total No. of Questions : 2 ] [ Total No. of Printed Pages : 1

**Code No. : MR-11**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– नवीनन्यायः

### भागः - १, पत्रिका - १

### विषयः - सामान्यनिरुक्तिः

**दिनाङ्कः** - 19-3-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. प्रश्नत्रयं उत्तरयत ।** **2 0x3=60**

१. विशिष्टान्तराघटितत्वं कुत्र कुतो देयम् ।

२. मण्युक्तं तृतीयहेत्वाभासलक्षणं विशदयत ।

३. व्याप्तिश्चान्वयतो व्यतिरेकश्चेति दीधितिग्रन्थं विवृणुत ।

४.'अत्र वदन्ति' कल्पं यथाग्रन्थं निरूपयत ।

**II. चतुर्णां प्रश्नानां समाधानं लिखत ।** **10x4=40**

१.निर्वह्निः पर्वतो वह्निमानित्यत्र दोषः कः ? परिहरत ।

२. 'विशिष्टविषयकत्वेन प्रतिबन्धकत्वं' इति दीधितिग्रन्थं सम्यक् विवृणुत ।

३. मेयत्वविशिष्टव्यभिचारेऽतिप्रसङ्गं वारयत ।

४. असाधारणे तथा सत्प्रतिपक्षेऽव्याप्तिः अस्ति न वा ?

५. हेत्वाभासानां दूषकत्वं कथम् ? यथाग्रन्थं निरूपयत ।

—०—

Total No. of Questions : 2 ] [ Total No. of Printed Pages : 1

**Code No. : MR-12**

# स्नातकपरीक्षाः—२०१४

## बि.ए. — विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्— नवीनन्यायः

### भागः - १, पत्रिका - २

### विषयः - चतुर्दशलक्षणी

**दिनाङ्कः** - 20-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 .P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**I. त्रयाणां प्रश्नानां सप्रपञ्चं उत्तरं लिखत** **3 x20=60**

१. प्रथमस्वत्यागे बीजं निरूप्य द्वितीयस्वं विशदयत ।

२. अनतिरिक्तवृत्तित्वं नाम किम् ?

३. विषयतासम्बन्धेन प्रतियोगिसामानाधिकरण्यनिवेशे दोषः कः ?निरूपयत ।

४. लक्षणे प्रतियोगितावच्छेदकावच्छिन्नत्वानिवेशे को दोषः ?

**II. अष्टप्रश्नाः समाधेयाः** **8x 5=40**

१. किं नाम न्यूनवृत्तित्वं ? तद्भिन्नत्वं कुत्र निवेश्यते ?

२. रूपसामान्याभावसाध्यकपृथिवीत्वहेतोः कथं सद्धेतुत्वम् ?

३. व्यधिकरणधर्मावच्छिन्नाभावानङ्गीकारे 'अयमात्मा ज्ञानात्' इत्यत्र कथं साध्याभावप्रसिद्धिः ?

४. 'द्रव्यसामान्याभावस्य तत्प्रतियोगित्वानपायात्' इति ग्रन्थं विवृणुत ।

५. साध्यतावच्छेदकसम्बन्धेन व्यापकत्वं कुतो निवेशनीयम् ?

६.गदाधरोक्तां 'अभावपदं भावभिन्नपरं' इतीमां उक्तिं साधयत ।

७. हेत्वधिकरणे स्वविशिष्टत्वस्य वैयर्थ्यप्रसङ्गं परिहरत ।

८. वह्नित्वेन प्रमेयं नास्तीत्यत्र कस्य प्रतियोगिता भासते ?

९. कपिसंयोगाभावसाध्यकमेयत्वे कथं अव्याप्तिपरिहारः ?

१०. 'ज्ञेयत्वादिना वाच्यत्वाभावः सुलभः' इति ग्रन्थं निरूपयत ।

—०—

Total No. of Questions : 3 ] [ Total No. of Printed Pages : 1

**Code No. : MR-13**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– नवीनन्यायः

### भागः - १, पत्रिका - ३

### विषयः - पक्षता

**दिनाङ्कः** - 22-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. अधोनिर्दिष्टप्रश्नान् उत्तरत ।**

१. व्याप्त्यनन्तरं पक्षधर्मतानिरूपणे सङ्गतिं निरूपयत ? **06**

२. 'पक्षता न कारणमिति तु भ्रमः' ससन्दर्भं विशदयत । **06**

३.पक्षधर्मतापदस्य पक्षतार्थकत्वमुपपादयत ? **06**

४. 'मन्तव्यश्चोपपत्तिभिः' श्लोकं विलिख्य भावमनुवदत ? **06**

५. पक्षताशरीरे 'धर्मित्वसाध्यत्वयोरवच्छेदकावनुप्रवेशनीयौ' विशदयत ? **06**

६. गङ्गेशोपाध्यायवैशिष्ट्यमनुवर्णयत ? **06**

**II. त्रयः समाधेयाः** **3 x 18=54**

१.'सन्दिग्धसाध्यधर्मत्वं पक्षत्वम्' परिष्कुरुत ।

२. सिसाधयिषायाः पक्षतात्वमाशङ्क्य निराकुरुत ।

३.'उच्यते....'इत्यादिना मणिकृदुक्तं सिद्धान्तलक्षणं सदलकृत्यं निरूपयत ।

४. 'अन्ये तु द्वित्रिक्षणान्तरितायां...' इत्यादिना निरूपितं मिश्रमतं विमृशत ।

**III. एकः समाधेयः** **1 x 10=10**

१. 'केचित्तु संशयत्वमत्र....' यथाजागदीशि निरूपयत ।

२. वाचस्पतिवचनयोः विरोधमाशङ्क्य परिहरत ।

—०—

Total No. of Questions : 2 ] [ Total No. of Printed Pages : 1

**Code No. : MR-14**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्धन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– नवीनन्यायः

### भागः - १, पत्रिका - ४

### विषयः - अवयवः

**दिनाङ्कः** - 23-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 .P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**I. चतुरः समाधेयाः** **4 x18=72**

१. उद्देश्यानुमिति....' इत्यादिना मणिकारोक्तं लक्षणं सदलकृत्यं व्याख्यात ।

२. मणिकारोक्तप्रतिज्ञालक्षणे मिश्राभिमतमनतिरिक्तपदप्रयोजनं विमृशत ।

३. निगमने अयमादिपदाननुषङ्गपक्षे मणिकारोक्तप्रतिज्ञालक्षणघटकस्य अनतिरिक्तपदस्य सार्थक्यमुपवर्णयत ।

४. मणिकारोक्तप्रतिज्ञालक्षणस्य 'वह्निमान् धूमात्' इत्यादौ अव्याप्तिमाशङ्क्य परिहरत ।

५. 'हेतुत्वश्च...' इत्यादिना मणिकारोक्तं हेतुलक्षणं सदलकृत्यं विवृणुत ।

**II. द्वयं समाधेयम्** **2 x14=28**

१. 'सङ्ख्यातिरिक्तसुबर्थस्य प्रकृत्यर्थविशेष्यत्वेनैव अन्वयात्'उपपादयत ।

२. 'सामान्यत्वे सति बाह्यकरणप्रत्यक्षविषयत्वात्' इत्यत्र अपार्थकत्वमाशङ्क्य निराकुरुत ।

३. प्रतिज्ञादिपश्चानां पौर्वापर्ये बीजमुपवर्णयत ।

—o—

Total No. of Questions : 11 ] [ Total No. of Printed Pages : 1

**Code No. : MR-19**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– धर्मशास्त्रम्

### भागः - १, पत्रिका - १

## विषयः - आपस्तम्बधर्मसूत्रम्

**दिनाङ्कः** - 19-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**सूचना–प्रथमतृतीयावनपहाय यथारुचि शताङ्कानामुत्तरं लिखत।**

**I. सूत्रार्थं विशदयत** **15**

१.पाणिग्रहणादधि गृह्यमेधिनोर्व्रतम्।

२. प्रयोजयिता मन्ता कर्तेति स्वर्गनरकफलेषु कर्मसु भागिनः।

३. यच्चैनयोः प्रियं स्यात्तदेतस्मिन्नहनि भुञ्जीयाताम्।

४. व्याख्यातास्सर्ववर्णानां साधारणवैशेषिका धर्मा राज्ञस्तु विशेषाद् वक्ष्यामः।

५. ऋतौ च सन्निपातो दारेणानुव्रतम्।

**II.** विवाहनिर्णयधर्मान् सफलं लिखत। **10**

**III.** अकराः के ? **05**

**IV.** वानप्रस्थधर्मान् विवृणुत। **10**

**V.** 'तिष्येण पुष्टिकामः' इत्यारभ्योक्तं मासिकश्राद्धप्रयोगं सङ्गृह्णीत। **10**

**VI.** श्राद्धे पङ्क्तिदूषणाः पावनाश्च। **10**

**VII.** अपरपक्षश्राद्धे तिथिविशेषेण फलविशेषं स्पष्टयत। **10**

**VIII.** ब्राह्मादिविवाहस्वरूपं लिखत **10**

**IX.** अतिथेरागमने आहिताग्नेर्धर्मान् लिखत **10**

**X.** वैश्वदेवान्नसंस्कर्तारः के। तद्धर्माश्च के ? विवृणुत। **10**

**XI.** गृह्यमेधिनोर्व्रतानि सङ्गृह्णीत **10**

—०—

Total No. of Questions : 17 ] [ Total No. of Printed Pages : 1

**Code No. : MR-20**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– धर्मशास्त्रम्

### भागः - १, पत्रिका - २

## विषयः - याज्ञवल्क्यस्मृतिः -२

**दिनाङ्कः** - 20-03-2014 ] **[ गरिष्ठाङ्काः - १००**

**समयः**- 2.00 .P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**सूचना - यथारुचि शताङ्कानाम् उत्तरं लिखत ।**

**I.** विवृणुत- ऊनद्विवर्षं निखनेन्न कुर्यादुदकं ततः । **10**

आ श्मशानादनुव्रज्य इतरो ज्ञातिभिर्वृतः ।

स दग्धव्य उपेतश्चेदाहिताग्न्यावृतार्थवत् ।।

**II.** आचार्यादीनां निर्हरणे ब्रह्मचारिणो नियमान् लिखत । **5**

**III.** अशौचे अभ्यनुज्ञाताः क्रियाः स्पष्टयत । **5**

**IV.** अन्तराजन्ममरणे अशौचं स्पष्टयत । **5**

**V.** नृपगौविप्रैर्हतानामाशौचं स्पष्टयत । **5**

**VI.** अदत्तकन्यादीनां मरणे अशौचकालं स्पष्टयत **5**

**VII.** आपद्यपि अपणनीयानि द्रव्याणि कानि ? विवृणुत । **10**

**VIII.** वानप्रस्थनियमान् सङ्गृह्णीत । **5**

**IX.** चतुर्थाश्रमाकारी कः ? **5**

**X.** यतेः भिक्षानियमाः के ? **5**

**XI.** नरः कदापतनमृच्छति ? तेन किं कार्यम् ? किं फलम् ? **5**

**XII.** ब्रह्महत्याप्रायश्चित्तं प्रकाशयत । **10**

**XIII.** सुरापानप्रायश्चित्तं लिखत **10**

**XIV.** असत्प्रतिग्रहप्रायश्चित्तं लिखत **5**

**XV.** गुरुतल्पगमने रहस्यप्रायश्चित्तं विवृणुत **5**

**XVI.** सान्तपनव्रतस्वरूपं लिखत **5**

**XVII.** तप्तकृच्छ्रस्वरूपं लिखत **5**

—०—

Total No. of Questions : 5 ] [ Total No. of Printed Pages : 2

**Code No. : MR-21**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– धर्मशास्त्रम्

### भागः - १, पत्रिका - ३

### विषयः - जैमिनीयन्यायमालाविस्तरः

**दिनाङ्कः** -22-03-2014 ] [ **गरिष्ठाङ्काः** - १००

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. श्लोकान् पूरयत ।** **20**

१. पदार्थानां....................वेदमानतः ॥

२. न विधेये..................युज्यते विधिः॥

३. दीक्षयित्वा.............दीक्षाविधिः श्रुतेः ॥

४.द्वादशाहस्य...............क्रमविधिर्मतः ॥

**II. विवृणुत** **20**

१. अग्निहोत्रं जुहोतीति यवागूं पचतीति च ।
क्रमः पाठादर्थतो वा पाठात् सर्वत्र दर्शनात् ॥

होमद्रव्यसमुत्पत्यै पूर्वं पाकोऽवगम्यते ।
यवाग्वेति श्रुता होमद्रव्यतातोऽर्थतः क्रमः ॥

२. उपकृतानां किं सप्तदशानां यूपबन्धने ।
क्रमो नास्त्यस्ति वा नास्ति नियामकविवर्जनात् ॥

आद्यं संस्कृत्यनुष्ठानं यत् क्रमेण स एव हि ।
क्रमोन्यत्र प्रवृत्तिस्तु क्रमस्यात्र नियामिका ।

**III. व्याख्यात** **20**

१. सारस्वताज्ये पूर्वत्वं बार्हस्पत्यचरावुत ।
धर्माणामाज्यनिष्ठानां प्राथम्यमुपदेशतः ॥
सक्रमाणां पदार्थानां चोदकप्रापितत्वतः ।
प्राथम्यमन्तरङ्गत्वादाग्नेयविकृतौ चरौ ॥

२. साकमेधेष्टयस्त्रिस्रो द्व्यह्नि स्युः सद्य एव वा ।
प्रातरादिद्वयोरह्नोः सत्वात् प्रकृतिवद् द्व्यह्ने ॥

–अनुवर्तते

साङ्गमुख्यानुरोधेन प्रातरादेर्विधानतः ।
श्रौतं सद्यस्त्वन्मन्त्रं तु चोदकात् तेन दुर्बलम् ॥

**IV.** पञ्चमाध्यायारम्भसमर्थनं कुरुत । **20**

**V.** षष्ठाध्यायप्रथमपादाधिकरणानि विविच्य प्रबन्धमेकमारचयत । **20**

—०—

Total No. of Questions : 8 ] [ Total No. of Printed Pages : 2

**Code No. : MR-22**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– धर्मशास्त्रम्

### भागः - १, पत्रिका - ४

### विषयः - बोधायनगृह्यसूत्रम्

**दिनाङ्कः** - 23-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 .P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**I. रिक्तस्थानं पूरयत ।** **2 x 10=20**

१. यथो एतद्धुत प्रहुत............इति सप्तपाकयज्ञसंस्था इति ।

२. तत्र यद्धूयते....................................चेति ।

३. अथ यद्दतो................................प्रत्यवरोहणम् ।

४. अथ यदि................................प्रहिणुयात् ।

५. रोहिणी...................................नक्षत्राणि ।

६. एकं.......विष्णुत्वाऽन्वेतु । द्वे........विष्णुस्त्वाऽन्वेतु ।
त्रीणि.....। चत्वारि....। पञ्च........। षड्..,,.....।
सप्त सप्तभ्यो.......................विष्णुस्त्वान्वेतु ।

७. अदितेऽनुमन्यस्व इति................................।

८.अनुमतेऽनुमन्यस्व इति ....................,,,,....।

९. सरस्वतेऽनुमन्यस्व इति............................।

१०. देवसवितः प्रसुव इति समन्तं प्रदक्षिणं................।

**II. सूक्तमुत्तरं चिनुत ।** **1 x 20=20**

१. सर्वे.......विवाहस्य । (मासाः, तिथयः)

२. प्रदक्षिणं......। (उपचारः, नमस्कारः)

३.आवेद्य..........कुर्यात् । (अर्घ्यं, पाद्यम्)

४. दक्षिणं पादं पूर्वं ब्राह्मणाय प्रसारयति । सव्यं...(शूद्राय, वैश्याय)

५. सिद्धे ........प्राह । (भूतम्,सुभूतम्)



–अनुवर्तते

६. तत.....इति इतरः प्रत्याह। (सुभूतम्, भूतम्)

७.पलाशेन स्रुवेणेति........। (आत्रेयः, आङ्गिरसः)

८. खादिरेणेति...........। (आङ्गिरसः, आत्रेयः)

९.ताम्रायसेनेति...........। (आथर्वणः, अत्रिः)

१०. अग्नये स्वाहाइति......। (उत्तरार्धपूर्वार्धे, दक्षिणार्धपूर्वार्धे)

११. अयास्यै..........जपति ।(दक्षिणेकर्णे,वामनकर्णे)

१२. अथ वाचं यच्छतः.....। (आनक्षत्राणामुदयात्, आसूर्योदयात्)

१३. उभौ जायापती .....भवतोऽधश्शयाते ।(व्रतचारिणौ ब्रह्मचारिणौ, ब्रह्मचारिणौव्रतचारिणौ)

१४. श्वोभूते दण्डमादाय पुण्याहं वाचयित्वा.....विसर्जयति। (अप्सु, भूमौ)

१५. उपनीतमात्रो व्रतानुचारी वेदानां किञ्चिदधीत्य.... (ब्राह्मणः,देवः)

१६. एकां शाखामधीत्य..........।(श्रोत्रियः,ऋषिः)

१७.अङ्गाध्यायी.........। (अनूचानः, भ्रूणः)

१८.कल्पाध्यायी........। (ऋषिकल्पः, अनूचानः)

१९. सूत्रप्रवचनाध्यायी.....। (भ्रूणः, देवः)

२०.चतुर्वेदात्.........। (ऋषिः, ब्राह्मणः)

III. पुंसवनं व्याख्यात। 10

IV. सीमन्तोन्नयनप्रकरणं विवृणुत। 10

V. जातकर्माचरणप्रक्रियां प्रकटीकुरुत। 10

VI. नामकरणं सूत्रोक्तप्रकारेण निरूपयत। 10

VII. ग्रन्थोक्तदिशा अन्नप्राशनक्रमं निरूपयत। 10

VIII. चूडाकर्मक्रमं प्रतिपादयत। 10

—०—

Total No. of Questions : 10 ] [ Total No. of Printed Pages : 1

**Code No. : MR-23**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– ज्योतिषश्शास्त्रम्

### भागः - १, पत्रिका - १

### विषयः - क्षेत्रमितिः

**दिनाङ्कः** - 19-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**सूचना - अन्तिममनपहाय आहत्य सप्तप्रश्नाः समाधेयाः।**

I. क). निर्दिष्टकोणस्य समानं भागद्वयं सालेख्यं दर्शयत। **7**

ख). निर्दिष्टरेखायां तद्गतनिर्दिष्टचिह्नाल्लम्बकरणं सालेख्यं प्रदर्शयत। **8**

II. समभुजत्रिभुजं समानकोणकमपि स्यादितीममंशं सालेख्यं प्रतिपादयत। **15**

III. त्रिभुजे कस्यापि भुजस्य वर्धनेनोत्पन्नः बहिः कोणः स्वपार्श्वस्थकोणसम्मुखकोणयोर्योगेन समानः तथा कोणत्रययोगः समकोणद्वयसमानो भवेदितीममंशं सोपपत्ति निरूपयत। **15**

IV. जात्यत्रिभुजे भुजकोटिवर्गयोगः कर्णवर्गसमः स्यादिति सालेख्यं उपपादयत। **15**

V. त्रिभुजे भुजैकतरस्य वर्धनेन बरिरुत्पन्नः कोणः स्वपार्श्वेतराभ्यामन्तःकोणाभ्यां प्रत्येकान्महान् भवतीति समर्थयत। **15**

VI. रेखयोः वर्गयोगः तयोः द्विघ्नघातान्तरवर्गयोगतुल्यो भवेदिति प्रतिपादयत। **15**

VII. सोपपत्ति निर्दिष्टत्रिभुजान्तर्वृत्तं विरचयत। **15**

VIII. निर्दिष्टत्रिभुजसमानं एकं समानान्तरचतुर्भुजं कर्तव्यमस्ति। यस्यैकः कोणः निर्दिष्टकोणेनसमानः स्यादिति साधयत। **15**

IX. वृत्ते केन्द्रबहिर्गते पूर्णज्ये यत्र सम्पातं कुरुतस्तत्रार्धिते न स्याताामिति समर्थयत **15**

X. केन्द्रम्, चापः, पूर्णज्या, वर्गक्षेत्रम्, मापकः, समभुजत्रिभुजम्, स्पर्शवृत्तम्, - एतेषु पञ्चानां लक्षणं सालेख्यं स्पष्टयत। **2 x 5=10**

—०—

Total No. of Questions : 10 ] [ Total No. of Printed Pages : 1

**Code No. : MR-24**

# स्नातकपरीक्षाः—२०१४

## बि.ए. — विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्— ज्योतिषश्शास्त्रम्

### भागः - १, पत्रिका - २

### विषयः - केतकीग्रहगणितम्

**दिनाङ्कः** - 20-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 .P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**सूचना - अन्तिममनपहाय आहत्य सप्तप्रश्नाः_समाधेयाः ।**

I. वेङ्कटेशेन नूतनगणितग्रन्थस्य आरम्भे उद्दिष्टान् हेतून् प्रतिपाद्य सिद्धान्तग्रन्थेभ्यः अस्य ग्रन्थस्य वैशिष्ट्यं स्पष्टयत । **15**

II. १९२८तमे शालीवाहनशकवर्षे वैशाखशुद्धपौर्णिमायां सोमवासरे अहर्गणं साधयत । **15**

III. कर्षसंस्कारकारणं गुरुशन्योः कर्षफलानयनक्रमं च निरूपयत । **15**

IV. चन्द्रस्फुटीकरणार्थं कतिसंस्काराः आवश्यकाः ? तेषां आनयनक्रमं धनर्णत्वं च प्रतिपादयत । **15**

V. ‘मेषादिगे सायनभागसूर्ये’ चरानयनक्रमं चरसंस्कारक्रमं च सप्रयोजनं विशदयत । **15**

VI. राश्यादिरविः-७-१२॰-३०’ गतिः-६०’कलाः
राश्यादिचन्द्रः-४-१३॰-४७’ गतिः-८२८’कलाः
एभिः उपकरणैः तिथिनक्षत्रयोः एष्यकालं साधयत । **15**

VII. कुजादीनां स्पष्टग्रहानयनक्रमं कुजबुधयोः शीघ्रफलस्पष्टीकरणं च निरूपयत । **15**

VIII. स्वोदयानयनक्रमं निरूप्य लग्नसाधनक्रमं विशदयत । **15**

IX. ग्रहणसम्भवज्ञानं कथं भवतीति निरूप्य यदा भूभा७८’ कलाः चन्द्रबिम्बम्-३०’कलाः, चन्द्रशरः११’कलाः, तदा ग्रासखग्रासप्रमाणे आनयत । **15**

X. **टिप्पणीरारचयत(द्वयोः)** **2 x 5=10**

१. मन्दफलानयनम् २. अक्षांशेभ्यः पलभानयनम्

३. दिक्साधनम् ४. वलनम्

—०—

Total No. of Questions : 8 ] [ Total No. of Printed Pages : 2

**Code No. : MR-25**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– ज्योतिषश्शास्त्रम्

### भागः - १, पत्रिका - ३

### विषयः - जातकपारिजातः

**दिनाङ्कः** - 22 -03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. रिक्तस्थानानि पूरयत ।** **5 x 1=5**

१. श्रीव्यङ्कटाद्रेः तनयः..................।

२.कन्याराशेः स्वरूपम्................।

३. ..........केन्द्रगता रजन्यां बलाढ्याः ।

४. राहोः मूलत्रिकोणराशिः............।

५. दृगाणा..............स्थानपानां भवन्ति ।

**II. एकेन वाक्येन उत्तरत ।** **5 x 1=5**

१. कालपुरषस्य सौख्यविज्ञानसारः ग्रहः कः ?

२. नवग्रहणाम् उपग्रहाः के ?

३. चतुष्पदस्वरूपौ ग्रहौ कौ ?

४.ऋक्शाखाधिपः ग्रहः कः ?

५. असुराचार्यस्य किं रत्नम् ?

**III. सङ्क्षेपेण उत्तरत (दशानामेव)** **10 x 3=30**

१. ग्रहाणां शुभाशुभत्वं स्पष्टयत ।

२. ग्रहाणां कालबलं विवृणुत ।

३.राहुदोषं बुधो हन्यादित्याद्युक्तदोषापहरणं विलिखत ।

४. शीर्षोदयगतः इत्याद्युक्तप्रकारेण ग्रहाणां फलप्रदानसमयं स्पष्टयत ।

५. प्रसूतिकालज्ञापिका ग्रहस्थितिः का ?

–अनुवर्तते

६.परेण जातं दैवज्ञाः कथं प्रवदन्ति ?

७. साह्योपरिष्टफलदायकयोगत्रयं विलिखत ।

८. पिण्डायुर्दाये रव्यादीनां वर्षसंस्थाः काः ?

९. आयुषः षड्विधहरणानि कानि ?

१०. ज्येष्ठानक्षत्रजातस्य फलं स्पष्टयत ।

११. समुदायाष्टकवर्गे बिन्दुस्थापनक्रमं स्पष्टयत ।

१२. दन्तोद्गमवशात् शुभाशुभचिन्तनं विलिखत ।

**IV. चतुर्णामेव सफला ग्रहस्थितिः विलिखत ।** **4x 5=20**

| | | |
|---|---|---|
| १. मालव्ययोगः | २.दरिद्रयोगः | ३.शारदायोगः |
| ४. राजयोगः | ५. उन्मादयोगः | ६.लक्ष्मीयोगः |

**V. श्लोकमिमं व्याख्यात** **1x 10=10**

वर्गोत्तमादिशुभवर्गयुतेऽमरेज्ये
लग्ने रसानलगते यदि वा बलाढ्ये ।
वित्तायवृद्धिगृहगेषु वियच्चरेषु
लग्नाधिपे बलयुते सुखमेति जातः ॥

**VI.** मेषादिराशीनां पर्यायनामानि सञ्चारस्थानानि च विलिखत **1x 10=10**

**अथवा**

चैत्रादिमासेषु जातस्य फलानि विलिखत ।

**VII.** जातकभङ्गयोगान् स्पष्टं विलिखत **1x 10=10**

**अथवा**

सूर्यादीनां वशात् फलविशेषचिन्तनक्रमं विलिखत ।

**VIII.** विलग्ने बलोपेते......इत्याद्युक्तायुर्ग्रहणक्रमं विशदयत । **1x 10=10**

**अथवा**

बालारिष्टयोगभङ्गाः स्थितीः विलिखत ।

—०—

Total No. of Questions : 8 ] [ Total No. of Printed Pages : 2

**Code No. : MR-26**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– ज्योतिषश्शास्त्रम्

### भागः - १, पत्रिका - ४

### विषयः - फलदीपिका

दिनाङ्कः - 23 -03-2014 ] [ गरिष्ठाङ्काः - १००

समयः- 2.00 .P.M. to 5.00 P.M.. ] [ Max. Marks : 100

---

**I. रिक्तस्थानानि पूरयत ।** **5 x 1=5**

१...............नामाहं वक्ष्ये फलदीपिकां सुविमलां ज्योतिर्विदां प्रीतये ।

२. द्वादशराशयः एते.......................।

३. राहोः मित्राणि.......................।

४. मूढोऽपि नीचरिपुगोऽष्टमषड्व्यवस्थो ग्रहः.......स्मृतः ।

५. ज्येष्ठानक्षत्रजाता................हन्ति ।

**II. एकेन वाक्येन उत्तरत ।** **5 x 1=5**

१. कस्मात् वृत्तिं जगुस्तद्विदः ?

२.रोगस्य चिन्तां कैः ग्रहैः कुर्युः ?

३. पित्रार्जितपापसङ्घैः बालकः कदा नाशमुपैति ?

४. शुक्रस्य उच्चराशिः कः ?

५. मरणचिन्तनं कस्मात् भावात् क्रियते ?

**III. सङ्क्षेपेण उत्तरत (दशानामेव)** **10 x 3=30**

१. अरण्ये......इत्याद्युक्तमेषादिराशीनां सञ्चारप्रदेशान् लिखत ।

२. केन्द्रचतुरस्रत्रिकोणभवनानि कानि ?

३. नवग्रहधान्यानि कानि ?

४. केतोः स्वरूपम् विलिखत ।

५. अन्तस्सारादिवृक्षान् के जनयन्ति ?

–अनुवर्तते

६. स्वोच्चादिस्थितेषु ग्रहाणामवस्थाः कति कानि ?

७. वक्रं गतस्य तथा हतदीधितेः ग्रहस्य वैशिष्ट्यं किम् ?

८. त्रीन् राजयोगान् विलिखत ।

९. मेषराशौ जातस्य फलं विलिखत ।

१०.कलत्रप्राप्तिकालं निर्दिशत ।

११. स्त्रीजातके चिन्तनविशेषविचारान् विलिखत ।

**IV. चतुर्णामेव सफला ग्रहस्थितीः विलिखत ।** **5x 5=20**

१. अशुभकर्तरीयोगः २.उभयचरीयोगः ३.सरस्वतीयोगः

४. श्रीनाथयोगः ५. अमलायोगः ६.परिकर्तनयोगः

**V. श्लोकमिमं व्याख्यात** **1x 10=10**

अंशेशेबलवत्ययत्नधनसम्प्राप्तिं बलोनेंशपे
स्वल्पं प्रोक्तफलं भवेदुदयतः कर्मर्क्षदेदेशे फलम् ।
अंशस्योक्तदिशं वदेत् पतियुते दृष्टे स्वदेशे फलम्
सत्यन्यैःपरदेशजं तदधिपस्यांशे स्वदेशे स्थिरे ॥

**VI.** लग्नादीनां भावानां सञ्ज्ञाः काः ? **1x 10=10**

**अथवा**

सफलं सलक्षणं पञ्चमहापुरुषयोगान् विलिखत ।

**VII.** बालारिष्टान् निरूप्य आयुर्दायविभागक्रमं विशदयत **1x 10=10**

**अथवा**

मरणकारणानि कानि स्पष्टयत ।

**VIII.** रव्यादिग्रहैः सूच्यमानाः रोगाः के ? **1x 10=10**

**अथवा**

रव्यादीनां सप्तग्रहाणां कारकपदार्थाः के ?

—०—

Total No. of Questions : 10 ] [ Total No. of Printed Pages : 1

**Code No. : MR-27**

# स्नातकपरीक्षाः—२०१४

## बि.ए. — विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्— पूर्वमीमांसाशास्त्रम्

### भागः - १, पत्रिका - १

### विषयः - भाट्टदीपिका-४

**दिनाङ्कः** -19 -03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

I. ऊहलक्षणं विलिख्य संस्काराणां अपूर्वार्थत्वं प्रतिपादयत। **10**

II. आग्नेयादियागाः देवतप्रसादद्वारा फलं प्रयच्छन्ति उत अपूर्वद्वारा फलं प्रयच्छन्ति ? विशदयत। **10**

III. 'त्सरा वा एषा यज्ञस्य तस्मात् यत् किञ्चित् प्राचीनं अग्नीषोमीयात् तेन उपांशु चरन्ति' इत्यत्र श्रुतं उपांशुत्वं ज्योतिष्टोमिकपरमापूर्वप्रयुक्तं उत दीक्षणीयादि अवान्तरापूर्वप्रयुक्तं वा ? विलिखत। **10**

IV. 'पत्नीसंयाजान्तानि अहानि संतिष्ठन्ते' इत्यत्र श्रुतं पत्नीसंयाजान्तत्वं सर्वेषां अह्नां भवति ? उत उत्तमवर्जं वा? विलिखत। **10**

V. रथन्तरादिसामस्वरूपं किमिति विलिखत। **10**

VI. परिधौ पशुं नियुञ्जीत। इत्यत्र विहितपरिधौ यूपधर्मानुष्ठानं सम्भवति वा ? न वा ? विलिखत। **10**

VII. बाधलक्षणं विलिख्य बाधस्य त्रैविध्यं निरूपयत। **10**

VIII. 'आग्नावैष्णवमेकादशकपालं निर्वपेत् दर्शपूर्णमासावारप्स्यमाणः' इति विहिता आरम्भणीयेष्टिः सोमयागाङ्गभूतदीक्षणीयादि इष्टिषु कर्तव्या वा ? न वा ? विलिखत **10**

IX. कृष्णलचरौ उपस्तरणं अभिघारणं च कर्तव्यं वा न वा ? विलिखत **10**

X. 'अग्निहोत्रहवण्या हवींषि निर्वपति' इति विहित निर्वापः आधानाङ्गभूतपवमानेष्टिषु सम्भवति वा न वा ? विशदयत। **10**

—०—

Total No. of Questions : 10 ] [ Total No. of Printed Pages : 1

**Code No. : MR-28**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– पूर्वमीमांसाशास्त्रम्

### भागः - १, पत्रिका - २

### विषयः - भाट्टदीपिका-६

**दिनाङ्कः** -20 -03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 .P.M. to 5.00 P.M.] [ Max. Marks : 100

---

I. आग्नेयादिषड्यागेभ्यः एकं फलं भवति वा? उत तत्तत् यागेभ्यः भिन्नं भिन्नं फलं भवति वा ?विलिखत 10

II. अङ्गानि विकल्पेन प्रधानं उपकुर्वन्ति वा ? उत समुच्चयेन प्रधानं उपकुर्वन्ति वा ? विलिखत। 10

III. कपिञ्जलाधिकरणं विलिखत। 10

IV. 'आग्नावैष्णवमेकादशकपालं निर्वपति। वामनो दक्षिणा' इत्यादौ
दक्षिणाभेदात् कर्म भिद्यते न वा?विलिखत। 10

V. ज्योतिष्टेमे अग्नीषोमीयादिपशौ यूपतन्त्रत्वं उपपादयत। 10

VI. स्रुक्-स्रुवादि पात्राणि प्रतिप्रयोगं भिद्यते ? उत तन्त्रम् वा ? विलिखत। 10

VII. पश्वर्थं अनुष्ठितानि प्रयाजाद्यङ्गानि पशुपुरोडाशयागस्य उपकुर्वन्ति न वा ? विशदयत। 10

VIII. निशीष्टौ दार्शिकं तन्त्रं प्रसज्यते वा न वा ? विशदयत। 10

IX. प्रयोजनैक्ये गुणानां विकल्पाधिकरणं विलिखत। 10

X. टिप्पणीः विलिखत। 2 x 5=10

१. अङ्गत्वम् २.अधिकारः ३. अतिदेशः

४. प्रयाजाः ५. दशपूर्णमासौ

—०—

Total No. of Questions : 6 ] [ Total No. of Printed Pages : 1

**Code No. : MR-29**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– पूर्वमीमांसाशास्त्रम्

### भागः - १, पत्रिका - ३

### विषयः - भाट्टकौस्तुभः-१

**दिनाङ्कः** -22-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

I. ग्रन्थोक्तदिशा अर्थवादानामप्रामाण्यं विशदयत । **15**

II. स्तुतिप्रयोजनं कथं ग्रन्थे प्रदर्शितम् ? दर्शयत । **15**

III. हेतुवन्निगदाधिकरणमारचयत **20**

IV. ग्रन्थोक्तरीत्या मन्त्राणामप्रामाण्यं व्यवस्थापयत । **20**

V. 'अम्यक्सात इन्द्र ऋषिरस्मै...' इत्यस्य कोऽर्थः ? ग्रन्थोक्तदिशा व्याकुरुत । **10**

VI. इमानि सूत्राणि व्याकुरुत । **20**

१. तथा फलाभावात् २. अविद्यमानवचनात्

३. गुणार्था वा पुनश्श्रुतिः ४. अभिधानेऽर्थवादः

—o—

Total No. of Questions : 6 ] [ Total No. of Printed Pages : 1

**Code No. : MR-30**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– पूर्वमीमांसाशास्त्रम्

### भागः - १, पत्रिका - ४

### विषयः - भाट्टकौस्तुभः-२

**दिनाङ्कः** - 23-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

I. स्मृतीनां धर्मे अप्रामाण्यमिति यथाग्रन्थं व्याकुरुत । **15**

II. विरोधाधिकरणे भाष्यकारस्याभिप्रायं कौस्तुभोक्तदिशा प्रतिपादयत । **15**

III. आकृत्यधिकरणमारचयत **20**

IV. आत्मतुष्टेः प्रामाण्यमस्ति नवेति प्रतिपादयत **10**

V. व्याकरणाधिकरणस्य सिद्धान्तं विशदयत । **20**

VI. इमानि सूत्राणि व्याकुरुत । **20**

१. न शास्त्र परिमाणत्वात्

२. प्रयोगशास्त्रमिति चेत्

३. अद्रव्य शब्दत्वात्

४. आख्या हि देशसंयोगात्

—०—

Total No. of Questions : 3 ] [ Total No. of Printed Pages : 1

**Code No. : MR-31**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– द्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - १

### विषयः - उपनिषद्भाष्यम्

**दिनाङ्कः** - 19-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. एकेन वाक्येनोत्तरत दशानामेव ।** **1x 15 = 15**

१. हरिः केन रूपेण देवानां मुक्तिदः ?

२. भगवतः कर्म इति नाम कुतः?

३. 'ग्रहाः' शब्दार्थः कः ?कति ग्रहाः ?

४. 'करकः' कोऽर्थः ?

५. यच्चान्यत् कालातीतं तदपि किम् ?

६. 'पाण्डित्यम्' इत्यस्य कोऽर्थः ?

७. कस्मात् वायुः देवदेवो विशिष्टः ?

८. विष्णुवाचकाः एकाक्षराः के ?

९. कार्यकारणबद्धौ कौ ?

१०. संसारिणां जीवशब्दवाच्यत्वे कारणं किम् ?

११. हरिः तुरीयरूपेण किं करोति ?

१२. अजः इति चतुर्मुखस्य नाम । किं कारणम् ?

१३. 'आरम्भणं विकारः' प्रयोगः कथं साधुः ?

१४.चक्रवर्तिनाम् आपः इति नाम किमर्थम् ?

१५. केषां सुखदुःखेन राजा शुभाशुभमाप्नोति ?

**II. रिक्तस्थानानि पूरयत** **1x 15 = 15**

१..........गुणपूर्णत्वात् आत्मा .........।

२. तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य...........।

–अनुवर्तते

३.परमात्मा............सर्वप्राणिशरीरगः ।

४. ......................श्रीर्गीरुमा तथा ।

५............सुप्तो यदा जीवः प्रबुध्यते ।

६...........न्यग्रोधपरिमण्डलः ।

७. .................तत्वविप्लवाः ।

८. ..............त्रिविधा विदुषां कथा ।

९.यद्वाविज्ञातमिवाभूदित्येतासामेव.........इति विदाञ्चक्रुः ।

१०. स्वयम्भूरिति.............विरिञ्चिः इष्यते ।

११. ................ओंकारासावतः परः ।

१२. .........सूक्ष्मतो गम्यः ।

१३. हं शब्दवाच्यः............

१४. लवणोदकदृष्टान्तेन परमात्मन कार्यं.......इति सिद्ध्यति ।

१५.'ता अन्नमसृजन्त' इत्यत्रान्नशब्दवाच्यः..........।

**III. यथारुचि सप्त समाधेयाः ।** **7 x 10 = 70**

१. वाचाम्भणं विकारो नामधेयमित्यादिश्रुतीनां सिद्धान्तार्थं लिखत ।

२. माण्डूकोपनिषदुक्तरीत्या सृष्टिविषये मतभेदं निरूप्य सिद्धान्तं लिखत ।

३. मनोऽन्नाभिमानिदेवताधीनत्वं सोपाख्यानं निरूपयत ।

४. भुक्तानामन्नाप्तेजसां त्रेधा विभागं यथाग्रन्थं विवृणुत ।

५. 'स य एषोऽणिमा, ऐतदात्म्यमिदं सर्वम् । तत्सत्यम् । स आत्मा अतत्त्वमसि' सभाष्यमर्थं लिखत ।

६. अन्तर्यामिब्राह्मणसारं सङ्गृह्णीत ।

७. गार्गिब्राह्मणोक्तं मुक्ततारतम्यं निरूपयत ।

८. माण्डुकोपनिषदुक्तरीत्या अकार-उकार-मकारप्रतिपाद्यरूपाणि विवृणुत ।

—०—

Total No. of Questions : 3 ] [ Total No. of Printed Pages : 1

**Code No. : MR-32**

# स्नातकपरीक्षाः—२०१४

## बि.ए. — विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्— द्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - २

### विषयः - गीताभाष्यम्

**दिनाङ्कः** - 20-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 .P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**I. एकेन वाक्येनोत्तरत दशानामेव।** **1x 15 = 15**

१. अनूनदशकं देहं मानुषमार्जते कः ?

२. यज्ञभाविताः देवाः किं दास्यन्ते ?

३. के सर्वकिल्बिषैः मुच्यन्ते ?

४.कः कर्ताऽहमिति मन्यते ?

५.मिथ्याचारः स उच्यते कः ?

६. गतसङ्गस्य मुक्तस्येत्यत्र 'मुक्तस्येत्यस्य कोऽर्थः ?

७. उपदेक्ष्यन्ति ते ज्ञानं। के ?

८. कः ज्ञानं लभते ?

९. साङ्ख्ययोगौ पृथगिति के प्रवदन्ति ?

१०. तेन मुह्यन्ति जन्तवः। केन ?

११. द्वैधं नाम किम् ?

१२. कः मित्रम् ?

१३.ततो यान्तिपरां गतिं। कः ?

१४.मोघं पार्थ स जीवति। कः।

१५. तथा तेनेदमावृतं।केन ?

**II. रिक्तस्थानानि पूरयत** **1x 15 = 15**

१..........वर्त एव च कर्मणि।

२. क्षिप्रं हि मानुषे लोके .........।

—अनुवर्तते

३. श्रोत्रादीनीन्द्रियाण्यन्ये..................।

४. तत्ते कर्म प्रवक्ष्यामि......................।

५..................संशयात्मा विनश्यति ।

६. ज्ञेयः स नित्यसन्न्यासी..............।

७. योगिभिरपि ज्ञानद्वारा .........प्राप्यते ।

८. प्रभुर्हि जीवः.................।

९. .............भ्रुवोर्मध्यमवलोकयन्नित्यर्थः ।

१०.आत्मैव ह्यात्मनो बन्धुः..............।

११. समानां विषमापूजा..............।

१२. यथा दीपो निवातस्थो.................।

१३. ततो ततो नियम्यैतत्...................।

१४.................वायोरिव सुदुष्करम् ।

१५. न हि कल्याणकृत् कश्चित्.............।

**III. यथारुचि पञ्च समाधेयाः।** **14 x 5 = 70**

१. लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ।
ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् ॥ ससन्दर्भं व्याख्यात।

२. तस्य कार्यं न विद्यते। ससन्दर्भं विवृणुत।

३. कमणैव हि संसिद्धिमास्थिता जनकादयः।
लोगसङ्ग्रहमेवाऽपि सम्पश्यन् कर्तुमर्हसि ॥ व्याख्यात।

४. जगच्चक्रस्वरूपं निरूय प्रकृतोपयोगं प्रतिपादयत।

५.अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥ व्याख्यात।

६. कमण्यकर्म यः पश्येदकर्मणि च कर्म यः।
स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत्। सभाष्यमर्थं लिखत।

—o—

Total No. of Questions : 3 ] [ Total No. of Printed Pages : 1

**Code No. : MR-33**

# स्नातकपरीक्षाः—२०१४

## बि.ए. — विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्— द्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - ३

### विषयः - तत्वोद्योतः

**दिनाङ्कः** - 22-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. अनयोरेकं प्रमेयमधिकृत्य प्रबन्धमारचयत।** **20**

१. अखण्डमेव ब्रह्म सकलश्रुतीनामभिप्रेतम्।

२. ब्रह्मज्ञानेन सर्वज्ञानबोधिका श्रुतिः।

**II. पञ्चैव प्रश्नाः समाधेयाः** **5 x 10=50**

१. मुक्तौ ईश्वरनियन्तृत्वप्रयोजके हीनोत्तमभावे प्रमाणानि कानि ?

२. अनिष्टप्रसङ्गेन एकजीववादं निराकुरुत।

३. अन्तिममङ्गलपद्ये विशेषणानां साङ्गत्यं निरूपयत।

४. दृश्यत्वाद्यनुमानानां असिद्धिं विवृणुत।

५. न हि युक्तिपराजितोऽपीति वचने युक्तिपराजित इति गुडजिह्विकयैवेति विवृणुत।

६. मुक्तेश्वराभेदे विद्यमानानि वाक्यानि कथं संयोजनीयानि ?

७.मुक्तामुक्तयोः भेदाभावे किमापद्यते।

**III. षडेव वाक्यानि सप्रसङ्गं विवृणुत।** **6 x 5=30**

१. न चान्नत्वे दुर्घटे तस्यानन्नत्वं भवति।

२. प्राधान्यज्ञानार्थमेव सृष्ट्यादिकथनम्।

३. नासदासीन्नोसदासीत्तदानीमित्यादि ब्रह्मणोऽपि मिथ्यात्वे प्रमाणमस्ति।

४.हस्तपादाद्युपाधिभेदेऽपि भोक्तुरेकत्वानुभवात्।

५. तस्य च तत्रैवाग्रहान्न कदाचिद्भेदनिवृत्तिरित्यनिवृत्तिरेव भवेत्।

६. यद्येवं नानिर्वचनीयत्वं ब्रह्मणस्तर्हि जगतोऽपि न स्यात्।

७. अंशिनः परमेश्वरस्यैव स्वाभाविकाभेदे सकलजीवगतसुखाद्यनुसन्धानापादनात्।

८. शुक्रवामदेवादिमुक्तिवदर्थ वादस्यापि सम्भवात्

—०—

Total No. of Questions : 3] [ Total No. of Printed Pages : 1

**Code No. : MR-34**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्— द्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - ४

### विषयः - विष्णुतत्वनिर्णयः

**दिनाङ्कः** - 23-03-2014 ] **[ गरिष्ठाङ्काः - १००**

**समयः**- 2.00 .P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**I. अनयोरेकं प्रमेयमधिकृत्य प्रबन्धमारचयत।** **20**

१. वेदापौरुषेयत्वम्।

२. स्थाननवकेऽपि भेद एव दृष्टान्ताभिधानम्।

**II. पञ्चैव प्रश्नाः समाधेयाः** **5 x 10=50**

१. प्रामाण्यस्य स्वतस्त्वानङ्गीकारे कथमनवस्था ?

२. न चासतो वैलक्षण्यं तत्प्रतीतिं विना ज्ञायते कुतः ?

३. मोक्षस्य सर्वपुरुषार्थोत्तमत्वं तस्य च विष्णुप्रसादैकलभ्यत्वं च उपपादयत।

४. 'विशेषणानि यानीह.......' पद्यमिदं व्याख्यात।

५.वेदवचनानां अनृतत्वादिकमाशङ्क्य परिहरत।

६. दिशः भ्रान्तिकल्पितत्वमाशङ्क्य निराकुरुत।

७. भेदविषये बाधकपरिहारपूर्वकं प्रत्यक्षं उपपादयत।

**III. षडेव वाक्यानि सप्रसङ्गं विवृणुत।** **6 x 5=30**

१. प्रीतिश्च गुणोत्कर्षज्ञानादेव विशेषतो दृष्टा।

२. न चोच्चारणकाल एव वर्णानामुत्पत्तिरिति वाच्यं, तदेवेदं वचनमिति प्रत्यभिज्ञाविरोधात्।

३. दुष्टबुद्धीनामप्रामाण्यशङ्केति परतोऽप्रामाण्यम्

४. न च तेन लोकोपकारः, धर्माद्यभावज्ञाने परस्परं हिंसादिनाऽपकारस्यैव प्राप्तेः।

५. ज्ञात्वैव हि इष्टसाधनतां प्रवर्तते निवर्तते च विपर्ययेण।

६. प्रत्यक्षागममाहात्म्यादनुमानं प्रमाणतां याति।

७. न च प्रमाणबहुत्वे दौर्बल्यं दार्ढ्यमेव हि बहुवाक्यसंवादे दृष्टम्।

८. अभेदज्ञानादप्रतिरेवोत्तमानां भवति। घातयन्ति हि राजानो राजाऽहमिति वदन्तम्।


—०—

Total No. of Questions : 6 ] [ Total No. of Printed Pages : 1

**Code No. : MR-35**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– अद्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - १

### विषयः - उपनिषद्भाष्यम्

**दिनाङ्कः** - 19-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

I. ऐतरेयोक्तदिशा सृष्टिं निरूपयत। **15**

II. प्रज्ञानस्य नामधेयानि कानि ? विवृणुत। **15**

III. 'कथमसतःसज्जायेत' इत्याक्षेपं परिहरत। **15**

IV. 'तत्त्वमसि' इति महावाक्यार्थं प्रतिपादयत। **15**

अथवा

मुक्त्यतिमुक्तस्वरूपं उपपादयत।

V. **इमौ मन्त्रौ व्याख्यात।** **10 x2=20**

अ). 'आत्मा वा इदमेक एवाग्र आसीत् नान्यत् किञ्चन मिषत्...........।

आ). तेषां खल्वेषां भूतानां त्रीण्येव बीजानि...........................।

VI. **टिप्पणीः लिखत (चतुर्णामेव)** **5 x4=20**

१. वामदेवस्य अनुभवः

२. त्रिवृत्करणम्

३. नदी दृष्टान्तः

४. अक्षरम्

५. सूत्रात्मा

—०—

Total No. of Questions : 6 ] [ Total No. of Printed Pages : 1

**Code No. : MR-36**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– अद्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - २

## विषयः - गीताभाष्यम् - २

**दिनाङ्कः** - 20-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 .P.M. to 5.00 P.M.] [ Max. Marks : 100

---

I. ज्ञानसाधनानि कानि ? तानि विवृणुत । **15**

II. दैवासुरसम्पदोः स्वरूपं प्रतिपादयत । **15**

III. त्रिविधं कर्मणः फलं निरूपयत । **15**

अथवा

अविद्या कस्य ? इति उपपादयत ।

**IV. श्लोकार्थं विलिखत । (द्वयोरेव)** **10 x2=20**

अ. क्षेत्रज्ञं चापि मां विद्धि.....................।

आ. उपद्रष्टानुमन्ता च........................।

इ. यस्य नाहङ्कृतो भावो.....................।

**V. टिप्पणीः लिखत ।** **5 x3=15**

अ. भगवद्गीता

आ. क्षेत्रम्

इ. संसारवृक्षः

**VI. भाष्योक्तं विशेषार्थं विलिखत ।** **10 x2=20**

१. जितात्मा २.विगतस्पृहः

३. असक्तबुद्धिः ४. अव्यक्तम्

५.अनादि ६. रागी

७. परन्तपः ८. कृष्णः

९. विविक्तसेवी १०. ततम्

—०—

Total No. of Questions :4 ] [ Total No. of Printed Pages : 2

**Code No. : MR-37**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– अद्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - ३

### विषयः - वेदान्तपरिभाषा-२

**दिनाङ्कः** - 22-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. एकवाक्येन उत्तरं लिखत** **10x1=10**

१.आसत्तिलक्षणं किम् ?

२. पदार्थः कति विधः ?

३. अर्थापत्तिः कति विधा ?

४. अभावः कति विधः ?

५.प्रामाण्यं कति विधम् ?

६. प्रलयो नाम कः ?

७. एकजीववादे जीवः कः ?

८. प्रयोजनम् कति विधम् ?

९. श्रवणादिषु कस्य अधिकारः ?

१०.लक्षणा कति विधा ?

**II. विस्तारेण उत्तरं लिखत** **12 x5=60**

१. वाक्यजन्यज्ञाने कारणानि कानि सोदाहरणं विशदयत।

२. अर्थापत्तिप्रमाणं प्रतिपादयत।

३. जगतः सृष्टिक्रमं प्रदर्शयत।

४. अभिप्रायभेदनिरूपणपूर्वकं शब्दापरोक्षज्ञानं प्रतिपादयत।

५. ज्ञानिनः प्रारब्धादिकर्मसम्बन्धः विद्यते न वेति विवृणुत।

अथवा

प्रामाण्यं स्वतः ज्ञायते उत परत इति विवेचयत।



–अनुवर्तते

**III. लक्षणं लिखत** **2 x5=10**

१. वाक्यप्रमाणम्

२. शक्तिः

३. अनुपलब्धिः

४. मननम्

५. श्रद्धा

**IV. टिप्पणीः लिखत। (पञ्चानामेव)** **4 x5=20**

१. वेदनित्यत्वम्

२. श्रुतार्थापत्तिः

३. सगुणोपासनम्

४. अभावः

५. लक्षणा

६. तत्त्वमसि

—o—

Total No. of Questions :5 ] [ Total No. of Printed Pages : 2

**Code No. : MR-38**

# स्नातकपरीक्षाः—२०१४

## बि.ए. — विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्— अद्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - ४

### विषयः - पञ्चदशी

**दिनाङ्कः** - 23-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 .P.M. to 5.00 P.M.] [ Max. Marks : 100

---

**I. एकवाक्येन उत्तरं लिखत** **10x1=10**

१.पञ्चदशी ग्रन्थस्य कर्ताः कः ?

२. योगवित्तमाः समाधिं किं प्राहुः ?

३. अन्तरस्पर्शाः कदा अभिव्यज्यन्ते ?

४. अस्पर्शयोगः कः ?

५. किं नाम सत्यत्वम् ?

६. घट्टितः कः ?

७. कीदृशं ज्ञानं साक्षात्कारशब्देन उच्यते ?

८. बन्धमोक्षयोः कारणं किम् ?

९. जीवः कः ?

१०. जीवकल्पितः संसारः कः ?

**II. श्लोकं पूरयत** **2 x5=10**

१. लिङ्गभाने....................उच्यते ।

२. उष्णः......................ईरितम् ।

३. सतः....................चिन्तयेत् ।

४. लीना.........विज्ञानमयशब्दभाक् ।

५. भार्या....................स्वरूपतः ।



–अनुवर्तते

**III. सान्वयं अर्थं विवृणुत। (पञ्चानामेव)** **4 x5=20**

१. वैराग्यं शान्तिदौदार्यमित्याद्या सत्वसम्भवाः।
कामक्रोधौ लोभयत्नावित्याद्याः रजसोत्थिताः॥

२. द्वैतावज्ञा सुस्थिता चेदद्वैते धीः स्थिरा भवेत्।
स्थैर्ये तस्याः पुमानेष जीवन्मुक्त इतीर्यते॥

३. अशेषप्राणिबुद्धीनां वासनास्तत्र संस्थिताः।
ताभिः क्रोडीकृतं सर्वं तेन सर्वज्ञ ईरित॥

४. मुक्तिस्तु ब्रह्मतत्वस्य ज्ञानादेव न चान्यथा।
स्वप्रबोधं विना नैव स्वप्नः हीयते यथा॥

५. मायाख्यायाः कामधेनोः वत्सौ जीवेश्वरावुभौ।
यथेच्छं पिबतां द्वैतं तत्वं त्वद्वैतमेव हि॥

६. ईक्षणादिप्रवेशान्ता सृष्टिरीशेन कल्पिता।
जाग्रदादिविमोक्षान्तः संसारो जीवकल्पितः॥

**IV. चतुर्णां एव उत्तरं लिखत** **10 x4=40**

१. जाग्रदादिषु संविदेकत्वं सयुक्तिकं निरूपयत।

२. पञ्चभूतविवेकतः सदद्वैतसिद्धिः कथं इति प्रदर्शयत।

३.उपनिषत्सु सृष्टिः कथं निरूपितम्? इति ग्रन्थोक्तदिशा व्याख्यात।

४. तित्रपटदृष्टान्तेन चिच्चातुर्विध्यं निरूपयत।

५. दार्शनिकाः आत्मस्वरूपं कथं अङ्गीकुर्वन्ति इति ग्रन्थोक्तदिशा प्रतिपादयत।

**V. चतुर्णामेव टिप्पणीः लिखत** **5 x4=20**

१.पञ्चकोशाः

२. माया

३. सप्तान्नम्

४. अशास्त्रीयद्वैतम्

५. हिरण्यगर्भः

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MR-39**

# स्नातकपरीक्षाः—२०१४

## बि.ए. — विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्— विशिष्टाद्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - १

### विषयः - उपनिषद्भाष्यम् - १

**दिनाङ्कः** - 19-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. सावतरणं व्याख्यात (त्रीण्येव)** **10 x3=30**

१. 'यथोर्णनाभिः सृजते गृह्णते च' ।

२. 'इति प्राचीनयोग्योपास्व' ।

३. 'मृत्युर्धावति पञ्चम इति' ।

४. 'यतः प्रसूता जगतः प्रसूती' ।

५. 'उद्दीप्यस्व जातवेदो' ।

**II. त्रीण्येव समाधत्त** **15 x3=45**

१.'कस्मिन्नु भगवो विज्ञाते' इत्यत्र सर्वशब्दस्य विशिष्टपरत्वं आशङ्क्य समर्थयत ।

२. ओङ्कारस्य ब्रह्मपरत्वं कथं साधितं माण्डूक्ये ? विशदयय ।

३. ऐतरेये प्रतिपादितदिशा जन्मत्रयनिरूपणं कुरुत ।

४. 'ब्रह्मणा सह' इत्यत्र भोग्यसाहित्यपरत्वं साधयत ।

५. पुच्छब्रह्मवादिनामाशयं निर्वर्ण्य निराकुरुत ।

**III. त्रयाणां टिप्पणीः रचयत** **5 x3=15**

१. 'न कर्मणा न प्रजया धनेन' ।

२. नारायणस्य सर्वविद्यावेद्यत्वम् ।

३. व्याहृत्युपासनप्रकारः ।

४. अर्चिरादिगतिपूर्वकफलप्राप्तिः ।

५. वारुणी विद्या ।

—अनुवर्तते

**IV. पदेनैकेन समाधत्त** **1 x10=10**

१. के भूतयोनिं परिपश्यन्ति ?

२. का विश्वस्य धारिणी ?

३. प्रणवो धनुः शरः- ?

४. परमं साम्यं कः उपैति ?

५. नद्यः कुत्रास्तं गच्छन्ति ?

६. ऋतं नाम किम्?

७. को नाम दमः ?

८. अन्तेवासिनं कः अनुशास्ति ?

९. सत्यं नाम किम् ?

१०. भूतानां ज्येष्ठं किम् ?

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 1

**Code No. : MR-40**

# स्नातकपरीक्षाः—२०१४

## बि.ए. — विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्— विशिष्टाद्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - २

### विषयः - गीताभाष्यम् - ३

**दिनाङ्कः** - 20-03-2014 ] **[ गरिष्ठाङ्काः - १००**

**समयः**- 2.00 .P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**I. सावतरणं व्याख्यात (त्रीण्ये)** **10 x3=30**

१. 'इदं शरीरं कौन्तेय' ।

२. 'ज्ञेयं यत्तत्प्रवक्ष्यामि' ।

३. 'मम योनिः महद्ब्रह्म' ।

४. 'मां च योऽव्यभिचारेण' ।

५. 'द्वाविमौ पुरुषौ लोके' ।

**II. प्रश्नत्रयं समाधत्त** **15 x3=45**

१.क्षेत्रक्षत्रज्ञयोः भगवदात्मकत्वं समर्थयत ।

२. सत्वरजस्तमसामाकारं तेषां बन्धनप्रकारश्च भाष्योक्तदिशा प्रपश्चयत ।

३. दैवीसम्पदाश्रितानां स्वरूपं विशदयत ।

४. त्यागसन्यासयोः वैलक्षण्यं उपपादयत ।

५. ब्राह्मणादिवर्णानां स्वरूपस्वभावान् ग्रन्थोक्तनयेन निरूपयत ।

**III. त्रयाणां टिप्पणीः रचयत** **5 x3=15**

१. आसुरस्वभावस्य मूलहेतुः ।

२. सात्विकाहारः ।

३. यज्ञादिकर्मणां 'ओमिति' शब्दान्वयप्रकारः ।

४. कर्मणः फलत्रैविध्यम् ।

५. सात्विकः कर्ता ।

—अनुवर्तते

**IV. पदेनैकेन समाधत्त** **1 x10=10**

१. किं नाम क्षेत्रम् ?

२. के बन्धहेतुविकाराः ?

३. रागहेतुभूतः गुणः कः ?

४. कः अप्रकाशो नाम ?

५. ऊर्ध्वं के गच्छन्ति ?

६. क्रोधो नाम कः ?

७. कर्मकराणां भूतानां सर्गौ कति विधौ ?

८. तमोद्वाराणि कति ?

९. कतिविधा श्रद्धा ?

१०. कीदृशाः आहाराः राजसस्येष्टाः ?

—०—

Total No. of Questions : 3 ]  [ Total No. of Printed Pages : 1

**Code No. : MR-41**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– विशिष्टाद्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - ३

### विषयः - उपनिषद्भाष्यम् - ४

**दिनाङ्कः** - 22-03-2014 ]  **[ गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ]  [ Max. Marks : 100

---

**I. पदेनैकेन समाधत्त** **1 x10=10**

१. अश्वमेधाङ्गभूताः के ?

२. मेधो नाम कः ?

३. कः मनोऽकुरुत आत्मन्वी स्यामिति ?

४. अर्कस्यार्कत्ववेदनस्य फलं किम् ?

५. संवत्सर आत्मा किमिति शब्दमकरोत् ?

६. कस्य पूर्णात्मत्वम् ?

७. अतिसृष्टिर्नाम का ?

८.येन अबलीयान् बलीयांसं आशँसते ?

९. कः सर्वेषां भूतानां लोकः ?

१०. केन कर्म करोति ?

**II. यथारुचि पञ्चैव प्रश्नाः समाधेयाः** **12 x5=60**

१. उद्गीतविद्यायाःप्रकरणभेदात् नानात्वं समर्थयत।

२.अमृतत्त्वार्थिन्यै मैत्रेय्यै याज्ञवल्क्येन उपदिष्टो मार्गः कः ? प्रपञ्चयत।

३. ग्रहातिग्रहयोः स्वरूपं विवेचयत।

४. बाल्य-पाण्डित्य-मौन-शब्दानां भाष्यानुरोधेन अर्थवैलक्ष्ण्यं निरूपयत।

५. परमाणुकारणवादं निराकुरुत।

६. ध्यायतीव लेलायतीव जीवः कथं लोके अनुसञ्चरति ?

–अनुवर्तते

**III. त्रयाणां टिप्पणीः आरचयत** **10 x3=30**

१. आत्मन्येव उपासीत।

२. सप्तान्नानि मेधया तपसा अजनयत् पिता ।

३. देवलोको वै लोकानां श्रेष्ठः ।

४. अथातो व्रतमीमांसा ।

५. त्रयं वा इदं नाम रूपं कर्म ।

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MR-42**

# स्नातकपरीक्षाः—२०१४

## बि.ए. — विद्धन्मध्यमा - तृतीयवर्षः

## शास्त्रम्— विशिष्टाद्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - ४

### विषयः - तत्त्वसारः - ४

**दिनाङ्कः** - 23-03-2014 ] **[ गरिष्ठाङ्काः - १००**

**समयः**- 2.00 .P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**I. पदेनैकेन समाधत्त** **1 x10=10**

१. तत्वसारस्य कर्ता कः ?

२. के जिज्ञास्यताहेतवः ?

३. कस्मिन् अधिकरणे प्रतिपत्तिदौस्थ्यं परिह्रियते ?

४. हिरण्मयः पुरुषः कुत्र दृश्यते ?

५. चतुष्पदा गायत्री कतिविधा ?

६. सामश्रुतिशिरः किम् ?

७. भूमाख्यः कः ?

८. इतिहासो नाम कः ?

९. निदानं नाम कः ?

१०. साम्ना नाम कः ?

**II. सावतरणं व्याख्यात** **10 x4=40**

१. 'धिक्कौमारिलदर्शनम्' ।

२. अथ मनवो विधेय परिबोधनकार्यमुखात् ।

३. सच्चत्यचेति सृष्ट्वा ।

४. सामानाधिकरण्यभागिषु ।



—अनुवर्तते

**III. उत्तरं लिखत (द्वयोरेव)** **15 x2=30**

१. सिद्धवस्तुनि व्युत्पत्तिः निर्बाधा इति सोदाहरणमुपपादयत ।

२. आङ्पूर्वकदिशिधातुः प्रशस्तिं वदतीति उपपादयत ।

३. तमसः द्रव्यत्वं समर्थयत ।

४. अरुणाधिकरणार्थः कः ? परमतनिरसनपूर्वकं परस्य वैषम्यनैर्घृण्याभावं उपपदायत ।

**IV. टिप्पणीः आरचयत** **5 x4=20**

१. शब्दाः कार्यपराः ।

२. पुच्छं ब्रह्म ।

३. संसर्गाभावो भावरूपः ।

४. दयादिगुणविषयः ।

—o—

Total No. of Questions : 8 ] [ Total No. of Printed Pages : 1

**Code No. : MR-43**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– शक्तिविशिष्टाद्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - १

### विषयः - शिवाद्वैतमञ्जरी इत्यादि

**दिनाङ्कः** - 19-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

I. प्रपञ्चसत्यत्वविचारे आक्षेपपूर्वकसमाधानं शिवाद्वैतमञ्जरी ग्रन्थोक्तरीत्या निरूपयत । **10**

II. श्रवणमननादि स्वरूपनिरूपणं कुरुत । **10**

III. जन्माधिकरणस्वरूपोपादानं विवृणुत । **10**

IV. अनुभवसूत्र ग्रन्थोक्तरीत्या स्थलशब्दार्थ निर्वचनं कुरुत । **10**

V. सङ्क्षेपेण लिङ्गाङ्गसंयोगविधिनिरूपणं कुरुत । **10**

VI. परमात्मनःसर्वान्तर्यामित्वं उपनिषद्रीत्या विवृणुत । **10**

VII. परमेश्वरस्य सर्वोपादानत्वात् सर्वात्मकत्वादिरूपान् तद्विभूतिश्च उपपादयत । **10**

VIII. **टिप्पणीः विलिखत** **5 x 6= 30**

१. साधनचतुष्टयम् ।

२. लिङ्गधारणस्य श्रौतत्वनिरूपणम् ।

३. षट्त्रिंशत् तत्वानि । **अथवा** लिङ्गत्रयम् ।

४. भुङ्क्ते यत्नात् स्वयं विश्वः ।

५. द्वा सुपर्णा सयुजा सखाया ।

६. दुःखस्यान्तो भविष्यति ।

—०—

Total No. of Questions : 7 ] [ Total No. of Printed Pages : 1

**Code No. : MR-44**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– शक्तिविशिष्टाद्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - २

## विषयः - शिवाद्वैतपरिभाषा इत्यादि

**दिनाङ्कः** - 20-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 .P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

I. शिव-जीव-शक्त्याख्य-पदार्थत्रयाणां पर्यायनामोल्लेखनपुरस्सरं शिवाद्वैतपरिभाषोक्तरीत्या निरूपणं कुरुत। 12

II. अनुमानस्य लक्षणपरीक्षे सप्रमाणं शिवाद्वैतपरिभाषानुसारेण उपपादयत। 12

III. अनुभवस्मृति-संशय-विपर्ययाणां शिवाद्वैतपरिभाषोक्तरीत्या लक्षणं निरूपयत। 12

IV. षट्स्थल ब्रह्मोपदेश विधि विधानं विशेषार्थप्रकाशिकोक्तरीत्या सङ्क्षेपेण विलिखत। 12

V. शिवार्पणतत्वज्ञानिनां वर्तनम् विशेषार्थप्रकाशिकोक्तरीत्या उपवर्णयत। 12

VI. भस्मधारणं, भस्मस्नानं त्रिपुड्रधारणं च ग्रन्थोक्तदिशा विशेषार्थप्रकाशिकोक्तरीत्या उपपादयत। 12

**VII. टिप्पणीः विलिखत** **7 x 4=28**

१. तटस्थ लक्षणम्।

२. प्रत्यक्षप्रमाणम्।

३. वाक्यलक्षणम्।

४. शक्तिविशिष्टाद्वैतदर्शनम्।

५. भक्तिः

६. दासोऽहं

७. न्यासक्रमः

—०—

Total No. of Questions : 7 ] [ Total No. of Printed Pages : 1

**Code No. : MR-45**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्— शक्तिविशिष्टाद्वैतवेदान्तशास्त्रम्

### भागः - २, पत्रिका - ३

### विषयः - क्रियासार इत्यादि

**दिनाङ्कः** - 22-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**सूचना—अन्तिममनपहाय षट् प्रश्नाः समाधेयाः।**

I. ब्रह्मसूत्रवृत्त्यनुसारेण 'सर्वत्रप्रसिद्धोपदेशात्' इति सूत्रं व्याख्यात। **15**

II. 'भूमासम्प्रसादादध्युपदेशात्' सत्ररीत्या सर्वापेक्षया अधिकत्वं परमेश्वरस्य साधयत। **15**

III. 'दहर उत्तरेभ्यः' इति सूत्रोक्ताक्षेपं निराकृत्य स्वसिद्धान्तं स्थापयत। **15**

IV. 'तदुपर्यपि बादरायणः सम्भवात्' इति सूत्रं सूत्रवृत्तिरीत्या देवानां ब्रह्मविद्यायां अधिकारः अस्ति वा न वा विमृशत। **15**

V. 'आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च' इति सूत्रस्य आशयं ब्रह्मसूत्रवृत्तिरीत्या व्याख्यात। **15**

VI. 'ईक्षति कर्मव्यपदेशात्सः' इति सूत्रं ब्रह्मसूत्रवृत्तिरीत्या व्याख्यात । **15**

VII. **षण्णामेव टिप्पणीः विलिखत।** **5x 5= 25**

१. रूपोपन्यासाच्च।

२. सुखविशिष्टाभिधानादेव च।

३. भेदव्यपदेशाच्च।

४. चमसवदविशेषात्।

५. ज्योतिर्दर्शनात्।

६. अल्पश्रुतेरिति चेत्तदुक्तम्।

—०—

Total No. of Questions : 7 ] [ Total No. of Printed Pages : 1

**Code No. : MR-46**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्— शक्तिविशिष्टाद्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - ४

### विषयः - कैवल्यसारः

**दिनाङ्कः** - 23-03-2014 ] **[ गरिष्ठाङ्काः - १००**

**समयः**- 2.00 .P.M. to 5.00 P.M.] [ Max. Marks : 100

---

**सूचना—अन्तिममनपहाय षट् प्रश्नाः समाधेयाः ।**

**I.** लिङ्गधारणस्थलं सम्यक् उपपादयत । **15**

**II.** अष्टमूर्तिनिरसनस्थलं सम्यक् प्रतिपादयत । **15**

**III.** निर्देशस्थलस्वरूपं महत्त्वं च निरूपयत । **15**

**IV.** चरस्थलपरस्थलयोः स्वरूपं उपपादयत । **15**

**V.** भावप्रकाशस्थलस्वरूपं ज्ञानप्रकाशस्थलमहत्त्वं च निरूपयत । **15**

**VI.** ज्ञानशून्यस्थलस्य स्वरूपं महत्त्वं च सम्यक् प्रतिपादयत । **15**

**VII. एतेषु पञ्चानामेव टिप्पणीः विलिखत ।** **5x 5= 25**

१. अनुबन्धचतुष्टयम् ।

२.सहजदानस्थलम् ।

३. आचारसम्पत्तिस्थलम्

४. सेव्यस्थलम् ।

५. दीक्षापादोदकस्थलम् ।

६. चराचरलयस्थलम् ।

—०—

Total No. of Questions : 7 ] [ Total No. of Printed Pages : 1

**Code No. : MR-47**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– जैनसिद्धान्तशास्त्रम्

### भागः - १, पत्रिका - १

### विषयः - पञ्चास्तिकायसङ्ग्रहः

**दिनाङ्कः** - 19-03-2014 ] **[ गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

I. ग्रन्थोक्तदिशा आत्मस्वरूपं प्रतिपादयत। **15**

II. नवपदार्थपूर्वकमोक्षमार्गस्वरूपं निरूपयत । **15**

III. मङ्गलाचरणपद्यं विलिख्य तस्यार्थं विवृणुत। **15**

IV. कालद्रव्यस्य व्याख्यानं विशदयत। **15**

V. ग्रन्थानुसारेण जीवस्वरूपं प्रतिपदायत। **15**

VI. **गाथामिमां व्याख्यात** **15**

मनुष्यत्वेन नष्टो देही देवो भवतीतरो वा।
उभयत्र जीवभावो न नश्यति न जायतेऽन्यः ॥

VII. **लघुटिप्पणीः रचयत** **2x 5= 10**

१. मोक्षमार्गः

२. बन्धः।

—०—

Total No. of Questions : 7 ] [ Total No. of Printed Pages : 1

**Code No. : MR-48**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्धन्मध्यमा - तृतीयवर्षः

## शास्त्रम्— जैनसिद्धान्तशास्त्रम्

### भागः - १, पत्रिका - २

### विषयः - सागारधर्मामृतम्

**दिनाङ्कः** - 20-03-2014 ] **[ गरिष्ठाङ्काः - १००**

**समयः**- 2.00 .P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**I.** 'मधुसेवनं पापबन्धनस्य कारणं भवति' कथनमिदं विचारयत। **15**

**II.** सागारधर्मामृतग्रन्थकर्तुः कालदेशादिकं विचारयत । **15**

**III.** सप्तव्यसनानि लिखित्वा विशदयत। **15**

**IV.** ग्रन्थोक्तदिशा श्रावकधर्मं विवृणुत। **15**

**V.** सम्यग्दर्शनज्ञानचारित्राणां स्वरूपं वर्णयत। **15**

**VI.** णमोकारमन्त्रं विलिख्य व्याख्यात **15**

**VII.** **लघुटिप्पणीः रचयत** **2x 5= 10**

१. जन्मकल्याणम्।

२.आस्रवः।

—०—

Total No. of Questions : 7 ] [ Total No. of Printed Pages : 1

**Code No. : MR-49**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– जैनसिद्धान्तशास्त्रम्

### भागः - १, पत्रिका - ३

## विषयः - तत्वज्ञानतरङ्गिणी

**दिनाङ्कः** - 22-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

I. शुद्धचिद्रूपस्य लक्षणं विलिख्य प्रतिपादयत । **15**

II. ग्रन्थोक्तदिशा व्यवहारनयस्य स्वरूपं विवृणुत । **15**

III. ग्रन्थकारः कः ? तस्य कालदेशादिकं वर्णयत । **15**

IV. 'तत्वज्ञानतरङ्गिणी' ग्रन्थस्य महत्त्वं विचारयत । **15**

V. शुद्धचिद्रूपस्य प्राप्तिः कथं भवति ? विशदयत । **10**

VI. **इमौ श्लोकौ व्याख्यात** **2x10= 20**

१. अनन्तानि कृतान्येव मरणानि मयापि न ।
कुत्रचिन्मरणे शुद्धचिद्रूपोऽहमिति स्मृतम् ॥

२. देवं शृतं गुरुं तीर्थं भदन्तं च तदाकृतिम् ।
शुद्धचिद्रूपसद्ध्यानहेतुत्वाद् भजते सुधीः ॥

VII. **अनयोः स्वरूपं विशदयत** **2x 5= 10**

१. आस्रवः

२. मोक्षः

—०—

Total No. of Questions : 7 ] [ Total No. of Printed Pages : 1

**Code No. : MR-50**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्— जैनसिद्धान्तशास्त्रम्

### भागः - १, पत्रिका - ४

## विषयः - पुरुषार्थसिद्ध्युपायः

**दिनाङ्कः** - 23-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 .P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

I. 'पुरुषार्थसिद्ध्युपाय' ग्रन्थस्य मङ्गलपद्यं विलिख्य विवृणुत । **10**

II. निश्चयव्यवहारस्य स्वरूपं वर्णयत । **15**

III. पुरुषार्थसिद्ध्युपायस्य महत्त्वं विचारयत । **15**

IV. सल्लेखना धर्मस्य व्याख्यानं विशदयत । **15**

V. ग्रन्थोक्तदिशा श्रावकधर्मं विवृणुत । **15**

VI. **इमौ श्लोकौ व्याख्यात** **2x10= 20**

१. आत्मा प्रभावनीयो रत्नत्रयतेजसा सततमेव ।
दानतपोजिनपूजाविध्यातिशयैश्च जिनधर्मः ॥

२. अविधायापि हि हिंसा हिंसाफलभाजनं भवत्येकः ।
कृत्वाप्यपरो हि हिंसाफलभाजनं न स्यात् ॥

VII. **लघुटिप्पणीः रचयत** **2x 5= 10**

१. अमृतचन्द्राचार्यः

२. सम्यग्दर्शनः

—०—

Total No. of Questions : 8 ]                                        [ Total No. of Printed Pages : 2

**Code No. : M[V]-11**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– वेदः सामान्यविभागः

### भागः -३, पत्रिका - १

### विषयः - चम्पूरामायणम्

**दिनाङ्कः** - -03-2014 ]                                        [ **गरिष्ठाङ्काः - १००**

**समयः-** ]                                        [ Max. Marks : 100

---

**I. अधोनिर्दिष्टेषु चत्वारः प्रश्नाः समाधेयाः ।**                                        **4 x 6= 24**

१. तारायाः परिवेदनं वर्णयत ।

२. सुन्दरकाण्डस्य सारांशं लिखत ।

३. हनूमान् कीदृशं रावणं दृष्टवान् ?

४. हनुमदुत्थानसमये महेन्द्रपर्वतस्य कीदृशं दौःस्थ्यं सञ्जातम् ?

५. सुन्दरकाण्डोक्तदिशा सन्ध्यां वर्णयत ।

६. हनुमत्कृतलङ्कादाहं वर्णयत ।

**II. एतेषु चतुरः श्लोकान् व्याख्यात ।**                                        **4 x 6= 24**

१. आधौ सिद्धौषधिरिव हिता केलिकाले वयस्या
पत्नी त्रेतायजनसमये क्षत्रियाण्येव युङ्क्ते ।
शिष्या देवद्विजपितृसमाराधने बन्धुरार्तौ
सीता सा मे शिशिरितमहाकानने का न जाता ॥

२. कारुण्यं निरवधि यत्तव प्रसिद्धं
शीतांशोः सहजमिवार्तिहारि शैत्यम् ।
तत्सर्वं मनुकुलनाथरम्यकीर्तेः
मत्पापात्कथय कथं त्वया निरस्तम् ॥

३. आदित्यः कृतकृत्य एव भविता सीतापतेरीदृशं
साहाय्यं विरचय्य कीर्तिमतुलामादित्सुना सूनुना ।
इत्यालोच्य तदा किल स्वमपि ख्यातिं गृहीतुं परां
लङ्कायां रघुनाथदूतसरणौ चन्द्रेण दीपायितम् ॥

४. ज्योत्स्नां विनाऽपि निवसेन्निशि शीतभानुः
छायां विनाऽपि विलसेद्दिवसेश्वरोऽपि ।



–अनुवर्तते

एनां विना रघुपतिः परिगृह्य धैर्यं
सप्राण एव वसतीति विचित्रमेतत् ॥

५. बद्धादरोऽपि परदारपरिग्रहेऽपि त्व-
मिक्ष्वाकुनायककलत्रमनार्य मा गाः ।
वाताशनोऽहमिति किं विनतासुतस्य
श्वासानिलाय भुजगः स्पहयालुतालुः ॥

**III. एषु ससन्दर्भं पञ्चानां भावार्थं स्फुटीकुरुत ।** 5 x 5= 25

१. अभिषेक्तुं स्थिता मेघास्तन्महीं महिषीमिव ।

२. तेन जीमूतकालेन देवकीनन्दनायितम् ।

३. का नाम रामधनुषः प्रथिता प्रशस्तिः ।

४. वैतानपावकशिखामिव वारणेन्द्रः ।

५ रामाभिकीर्तनमधूनि शनैर्न्यषिञ्चत् ।

६. प्राणवायुमविनीत तावकं कालयापनमपास्य पास्यति ।

७. दूतो न वध्य इति शास्त्रगिरा रुरोध ।

IV. एषु **पञ्चानां** विग्रहवाक्यानि लिखत । 5 x 1= 5

१. वासविवायसः २. कापुरुषः ३. मदान्धहृदयः ४. प्राणवायुम्
५. पिशिताशनेन्द्रः ६ यथेच्छम् ७. पञ्चबाणीविभिन्नम् ।

V. एषु **पञ्चानां** लकार-पुरुष-वचनानि लिखत । 5 x 1= 5

१. वक्ष्यति २. ददर्श ३. अवोचत ४. प्रविशति
५. अभूत् ६. भज ७. अरुणत् ८. अवजगाहे

VI. एषु **पञ्चानां** तत्तद्विभक्तिरूपाणि लिखत । 5 x 1= 5

१. रामस्य २. हरिम् ३. वालिनम् ४. हनुमतः
५. तस्मिन् ६. धनुषः ७. वायुना ८. निशाचरीः

VII. एषु **षण्णां** पर्यायनामानि लिखत । 6 x 1= 6

१. कलत्रम् २. पौलस्त्यः ३. पवमानबन्धुः ४. शतभानुः
५. जीवितेशः ६. प्रत्ययः ७. शिलीमुखः ८. प्रभञ्जनः

VIII. एषु **षण्णामर्थं लिखत ।** 6 x 1= 6

१. कादम्बिनी २. निशाचरः ३. कृतान्तः ४. शणवल्कलम्